No. ३६३१

Title वेद स्तुतिः व्याख्या (महाभारत)

Author ✗

Extent १६-२:७६ Age ४

Subject पुराण माहात्म्य

वेदस्तुतिव्याख्या श्रीभागवते

२६३२

श्रीगणेशाय नमः ॥ पूर्वाध्यायोक्ते वेदांतानां ब्रह्मपरत्वमाकर्ण्य तदघटमानमन्वानो ऽयमाशंकते ब्रह्मणीति भो ब्रह्मन् ब्रा
ह्मणश्च तयोर्वेदाः प्रसक्तिं कथं चरंति सत्यज्ञानानंदलक्षणे ब्रह्मणि कथं प्रतिपादयंतीत्यर्थः ननु सत्यं ज्ञानमित्यादि
ना बोधयंतीति कथमुच्यते कथमिति उच्यते लोके यद्यद्धर्मविशिष्टयोः संबंधो गृह्यते तत्तदेकधर्मविशिष्टज्ञानादपरधर्म
विशिष्टस्मृतिः यथा हस्तिहस्तिपकादौ पदपदार्थयोरपि संबंधव्यवस्था येन च रूपेण पदात्पदार्थस्मृतिस्तेनैव रूपेण शा
ब्दबोधः न हि स्मृतिर्निर्विकल्पिका अनुभवस्मृत्योः समानप्रकारकत्वेन कार्यकारणभावात् न चानिर्विकल्पकोपस्थि
तस्य शाब्दानुभवप्रवेशः आकांक्षादिविरहात् तथा च गवादिपदस्य विशिष्टशक्तिग्रहं विना न गोत्वादिनोपस्थितिः विशिष्ट
शक्तिग्रहस्य च विशेषणविशेष्योभयवृत्तित्वात् किंचिद्विषयत्वनियमात् प्रकृते कथं सत्यादिपदाद्ब्रह्मणो निर्विकल्पकस्म
रणं ततः शाब्दबोधो वेत्यभिप्रेत्य ब्रह्मविनिश्चिनोति अनिर्देश्य इत्यादिना पदैः पदार्थबोधयत्वं च विनिमुख्यया वृत्त्या प्रवर्त्तते क
चिल्लक्षणया क्वचिद्गौण्या मुख्यापि रूढियौगिकभेदेन द्विधा जात्या द्रव्येण गुणेन स्पंदेन वा संज्ञासंज्ञिसंकेतेन प्रव
र्त्तते यथा गौः पशुः धन्यः चपलः इत्यादि योगवृत्तिस्तु सांतनिर्दिष्टशब्दवृत्तिलभ्यार्थयोगेन यथा पंकजं औ
पगवः पाचकः इत्यादि लक्षणा च शक्यसंबंधः यथा गंगायां घोष इत्यादि गौणी वाभिहितार्थलक्षितगु
णयुक्तेन तत्सदृशे यथा सिंहो देवदत्त इवेति तत्र न तावद्ब्रह्मणि मुख्यावृत्तिर्घटत इत्याह अनिर्देश्ये निर्देशानर्हे तत्र
हेतुः सदसत्परं इति सत् स्थूलं कार्यं असत्कारणं सूक्ष्मं ताभ्यां भिन्नो निर्धर्मकस्वभाव इ जातिद्रव्यगुणक्रियासंबं
धादिरहिते ब्रह्मणि कथं पदप्रवृत्तिरिति भावः एवं लक्षणावृत्तिरपि निरस्ता निःसंगे शक्यसंबंधरूपलक्षणाया अ
धादिति गुणवृत्तिं मुखतो निराचष्टे निर्गुण इति अत्रापि सदसत्परत्वमेव हेतुः ननु यत्र शक्यनानात्वं तत्रैव शक्या

कुगमार्थं शक्यतावच्छेदकापेक्षा शक्ततेतु तदैक्यमेवेति तस्मादपि पदमात्रोशादिपदत्वविनिर्भिन्नमेव प्रवर्त्ततां यदि
च विना लक्षणां तत्प्रकारकबोधार्थं सर्वत्र तदवच्छिन्ने शक्तिराकाशादिपदानामपि शब्दाश्रयत्वादिविशिष्ट एव
साभ्युपेयते कश्चिदाकाशः शब्दाश्रयइत्यादौ त्वष्टद्व्यातिरिक्तइक्वतादिप्रबोधो लाक्षणिकस्तदा सुलक्षणैव
अत्र विनापि लक्ष्यतावच्छेदकं सर्वत्र लक्ष्यतावच्छेदकविशिष्टे लक्षणानियमस्याप्रामाणिकत्वात् नीलं घोगादि
रूपलक्षणायाम्नीरत्वादावसंभवाच्चेत्यत आह गुणरक्तपदादि श्रुतिविरोधमेतत् गुणैः शक्यतावच्छेदकलक्ष्य
तावच्छेदकादिधर्मैर्लिङ्गितामूर्तैर्विषयेषु वृत्तिः प्रवृत्तिर्यासां ताइत्यर्थः अन्वयितावच्छेदकावच्छिन्न एवेतरपदार्था
न्वयबोधस्यवाक्यादुपलब्धस्य सर्वत्र निर्वाहार्थं तत्तद्धर्मविशिष्ट एव पदानां शक्तिलक्षणान्यतरस्वीकारस्ति रभ्युपेयते
यद्धर्मविशिष्टे यच्छक्तिग्रहः स एव धर्मः शक्तिस्थले शक्यतावच्छेदकोलक्षणास्थले च लक्ष्यतावच्छेदक इत्युच्यते।
इयांस्तु विशेषो विशिष्टे शक्यत्वप्रतीतो बाधकाभावात् शक्यतावच्छेदके विशक्तिः विशिष्टे लक्ष्यत्वप्रतीतौ तु बाधान्न
लक्ष्यतावच्छेदके लक्षणेति तथा च निर्धर्मकत्वेन पदार्थस्य लक्षणो वाच्यार्थत्वानुपपत्तेः कथं वेदांतानां ब्रह्म
परत्वं यथा वर्गे तु शक्यं यथा वर्गे तु शक्यं तथा मां प्रतिबोधयेति राज्ञः प्रश्नः २ अनिर्देश्यत्वादिलक्षणेत्र लक्षणिसा
क्षादप्रहृत्तावपि भागत्याग लक्षणया प्रवृत्तिर्भवेदित्यभिप्रेत्योत्तरमाह बुद्धीत्यादि अत्र यत्स्व[illegible] आहार
णयोजना जनानां मात्रार्थं बुद्ध्यादीन्योऽसृजत् स प्रभुरीश्वर इति जायंते विविधोपाधिभिर्जायंत इति जना
जीवास्तेषां मीयंते इति मात्राः शब्दादयो विषयास्तदर्थमिन्द्रियाण्यसृजत् तथा जनानां मुक्त्यै देहादेहांतरप्राप्ति
तदर्थं प्राणानसृजत् तथा जनानामात्मने हंकाराय मनो सृजत् तथा जनानाम कल्पनाय मोक्षाय बुद्धिम

ग्रासस्तमस्तैश्वर्यादिविष्ठोऽसि अतस्तवैव सामर्थ्यं न जीवानां कारणं तावच्छेदकीभूतनिश्चरत्वस्वाभावात् प्रतिबंधकीभूतजीवत्वस्यत्वाद्
जीवेश्वरविभागस्यतन्त्रादित्यादितिभावः किंतत्रमानं तत्राह तदिति तेन्वरतइतिकर्मणिषष्ठी तांकश्चित्साक्षिकर्मेह्यद्यकालेऽजयामायया स्व
ष्टिपरयासहानुचरंतंक्रीडंतं सर्वजनादिव्यापारमाचरंतमीश्वरं तथाऽजयाऽविद्ययाऽत्मस्यानुचरं तं जाग्रदादिव्यापारमाचरं तं जीवं निग
मः यतो वाइमा० मायां तु प्र० श्वरं। तद्यथा महामत्स्य उभे कूले ऽनुसंचरंतं पूर्वं चापरं च एवमेवायं पुरुष एतावंतावनुसंचरति स्वप्नांतं च बुद्धांतं
चेति वेदोऽनुचरेद् बोधयति अत्र कश्चिदित्यनेन जगत्स्रष्टृत्वं कादाचित्कमिति वदतातटस्थलक्षणमिति ज्ञापितं सार्वदिकमेव न कुतस्तत्राह
आत्मनाचेति च पुनः आत्मना निरुपाधिकेन सत्यज्ञानानंतानंदाद्वितीयस्वरूपेणानुचरंतं स्थितं त्वां प्रतिपादयेदित्यर्थः सत्यं ज्ञानमनंतं ब्रह्म
एकमेवाद्वितीयं योऽयं विज्ञानमयः न दृष्टेर्द्रष्टारं पश्येरित्यादिनिगमः प्रतिपादयेत् तथा चाद्वितीयादिशब्दसमर्पितस्वरूपलक्षणेन विरोधा
ज्जगत्स्रष्टृत्वादिकं कादाचित्कमेव न सार्वदिकं अन्यथा तत्त्वमस्यादिश्रुतो भेदो बाधितः स्यादिति भावः एतदुक्तं भवति यद्यपि जीवो ब्रह्मैव त
स्य स्वाज्ञानतो बद्धस्य स्वज्ञानादेव मोक्षो भवति तथापि तज्ज्ञाने स्वप्रयत्नापेक्षया ईशसंकल्पितोऽतिशीघ्रं लभ्यत इति ज्ञानमार्गतो भक्तिमार्गः श्रे
यानिति २ व्यावहारिकभेदमनुसृत्य स्वीयां नामजां जहीतिप्रार्थितं इदानीं तत्त्वदृशा स्वस्यैवाविद्यां जहीति प्रार्थयंति स इति भो भगवन् नेत
दुपजन्यं जीवेशत्वदुपाधिजातं वृहत्त्वं ब्रह्मत्वमेवेत्यवयंति स इदं सर्वं यदयमात्मेत्यादिश्रुतयः एकः समस्तं यदिहास्ति किंचित्तदच्युतो नास्ति परं ततो
न्यत् सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहमित्यादिस्मृतयश्चेति शेषः ननु प्रतीयमानपरिच्छिन्नरूपस्य कथं ब्रह्मत्वं तत्राह अव
शेषतयेति नामरूपत्वबाधेनेत्यर्थः यच्चोरः स्थाणुरित्यादावेव जीवत्वेशत्वाद्युपाधिबाधेनैवाभेदस्य स्वीकारादिति भावः तदुक्तं वार्त्तिके
योऽयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव ब्रह्मास्मीति धिया शेषा अहंबुद्धिर्निवर्त्यत इति किं तद् ब्रह्म यद्धिया सर्वद्वैतबाधस्तत्राह यत उदस्मात्त
मयो विकृतं इति यतो यस्मादभिन्ननिमित्तोपादानाद्धेतोः कार्यजातस्योत्पत्त्यादयो जन्मलयौ भवतः तत्र जीवेशयोः स्वरूपतः कार्यत्वाभावे
प्युपाधिव्याप्त्योत्पत्तिरिति मंतव्यं तटस्थलक्षणमिदं जन्माद्यस्य यत इति न्यायेन बोध्यं कारणत्वं ब्रह्मणः किंवत्तत्राह मृदिवेति वाशब्द इवार्थः त
थाच यथा मृदादिस्वविकारोत्पत्तिलयोर्नतथा ब्रह्मणोऽपीति भावः इयांस्तु विशेषो मृदुपादानमेव स्वविकारस्य ब्रह्मतु निमित्तमपि युज्यते चमृदिवोपादानं वे

अन्यथा येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं भवतीत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा यथा सोम्यैकेन मृत्पिंडेन सर्वं मृण्मयं विज्ञातं
स्याद्वाचारंभणो विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादि दृष्टांतेनोपपाद्यमाना पीडिता स्यात् उपादानोपादेयभाव मृतेऽमेदस्यत्मृतेच
सर्वत्र द्विकारविज्ञानस्यासंभवादिति भावः तर्हि किं मृद्वद्विक्रियते तत्राह अविकृतादिति अजायमानो बहुधा विजायत इत्यविक्रियमाण
स्यैव बहुभवनश्रवणान्न विक्रियत इत्यर्थः तथा च विवर्त्तोपादानत्वमेव ब्रह्मणो न परिणाम्युपादानत्वमिति भावः इत्थं चोपादानत्वाविक्रि
यत्वाभ्यां ब्रह्मणो जगद्विवर्त्ताधिष्ठानत्वं जगद्बाधावधित्वंच लक्षणं लब्धं ननु तर्हि कथं मृदिवेति दृष्टांतः नहि मृद्विकाराणां रज्जुभुजंगवद्बाध
तास्तीति चेन्न वाचारंभणं विकारो नामधेयमिति तेषामप्यनृतत्वश्रवणात् अयं भावः स्वरूपपरित्यागे न रूपांतरापत्तिः परिणामः सत्तसत्ता
3 कोन्यथाभावो वा विवर्त्तस्तु पूर्वरूपापरित्यागेन रूपांतरप्राप्तिः विषमसत्ताकोन्यथाभावो वा तत्र परिणामो यथा दुग्धस्य दधि विवर्त्तो य
था मृदो घटः प्रकृतेऽज्ञानस्य प्रपंचः परिणामो ब्रह्मणो विवर्त्तः तत्र व्यावहारिकस्य घटादेः शुक्तिरजतरज्जुभुजंगादिवद्बाधाभावेपि ज्ञान
नाश्या ज्ञानमूलकस्य श्रुतियुक्तिभ्यां मिथ्यात्वं सिद्धमिति न दृष्टांतैमस्तीति तस्माद्युक्तमुक्तं सर्वबाधे ब्रह्मैवेति किं तेन तत्राह अत इत्यादि मतोज
गत्सर्वमनृतं किंतु ब्रह्मैव सत्यं अतः कारणद्वयोमेत्र इष्टार ×वेसम्य× स्त्वय्येव ब्रह्मण्यपरखंडार्थे मनो वचनाचरितं मनसाऽाचरितं तामर्थेवि
चनाचरितमभिधानं च दधुर्धीतवंतः न भेदं पश्यन्तीत्यर्थः तत्र निदर्शनं कथमयथेत्यादि भुवीत्यलुक्समासः नृणां चरणानां भुवि स्तानि
पदानि कथं अयथा भुवि अस्तानि भवंति न कथंचित् तद्विवर्त्तस्य सविशेषस्य प्रतिपादनेपि तस्यैव प्रतिपादनं न विरुध्यते तद्विवर्त्तस्य
तदभिन्नत्वादिति भावः अथवा यतस्त्वमेव सर्वमतः कारणात्कश्रयः ज्ञानभक्तिकर्मनिष्ठाः सर्वेपि त्वय्येव मनो वचनाचरितं दधुः मनो वच
नाभ्यां कृतं समर्पयंति ब्रह्मार्पणं कुर्वंति देहाभिमानिनः कर्मिणः कथमर्पयंतीति तत्राह कथमयथेति कर्मदेवेभ्योर्पयंतोपि त्वय्येवार्प
यंति सर्वस्य त्वद्विभूतित्वादिति भावः अत एवोक्तं येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः तेपि मामेव कौंतेय यजंत्यविधिपूर्वकमिति २
ऋषयस्त्वयि मनोवचनाचरितं दधुरित्यनेन साध्यसाधनभेदेन द्विविधभक्तियोगस्य सद्भिराचरितं ज्ञापितं तत्र साधनभक्तेः किं फलं किंवा
साध्यभक्तेरित्याशंक्य द्वयोरप्यंतरायभ्यां तदाह इतीति भोत्र्याधिपते त्रयाणां कर्मज्ञानभक्तियोगानां फलदातृत्वेनाधिपतिः अत एवाखिल

तो कमलेक्षण सकलजन त्रिविधमलनिरसनहेतोः स्वरयः पंडिता भवन्माहात्म्यविदः इत्युक्तप्रकारेण तव कथामृतवगुणस्वस्वरूपावगणनिमग्न
णं सैवामृतसाधनत्वाद्दुरवगाहत्वाच्चामृतताधिक्यं अवगाहनिमग्नतया पूतीति तपसि पापानि जहत्यात्मवंतः एतेन साधनभक्तिफलभक्तिमिति द
र्शितं साधनभक्त्याः कृतार्था भवंतीत्युक्त्वा फलभक्तानां कृतार्थताकैमुत्यन्यायसिद्धेत्यत आह किमुतेति हे परमेश्वर ये पुनः स्वधाम्ना विधुताशयकाल
गुणाः स्वधाम्ना स्वरूपप्रकाशेन विधुताः रज्जुभुजंगवद्बाधिताः आशयगुणा अंतःकरणधर्मा रागादयः कालगुणाः शीतोष्णादयो यैस्ते तथाभूता
परमेश्वरस्याजस्रसुखानुभवं अखंडानंदरसं चिद्रूपं भजंति सेवंते प्रेम्णा ते दुःखानि त्यजंतीति किमु वक्तव्यं सोयं त्रिविधतापनाशनः पुमर्थरू
पायाः फलभक्तेर्नांतरीयकं फले भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे तद्यथा पुष्करपलाशे आ
पो न श्लिष्यंते एवमेवं न विदित्वा पापकर्मा न श्लिष्यते न कर्मणा लिप्यते पापकेन तत्सुकृतदुष्कृते विधुनुते एतं ह वाव न तपति किमहं साधु
नाकरवं किमहं पापमकरवमित्यादिश्रुतिभिर्ज्ञानेनैव सर्वानर्थस्य निवृत्तिर्तात् अतः प्रेमभक्तेः परपुरुषार्थशिरोवफलं एवं सपुरुषा
र्थी भक्त्या लभ्यस्तन्नान्ययेति स्मृतेः ३ एवं भक्तिमंतः कृतकृत्या इत्युक्त्वा भक्तिविमुखान्निंदति दृतय इवेति मोक्षमधिपते महदहमाद्यः महत्तत्त्वा
हंकारादयः ते तवानुग्रहतः संकल्पात् यदंडं स्थूलसूक्ष्मशरीरं असृजन्सृष्टवंतः अत्र यच्छब्दसंबंधात्तदित्यध्याहार्यं तदनुविधाय असुभृतः स्व
त्कुलोंऽमनुविदधतीत्यनुविधास्तद्भेदाभ्यासेन तद्धर्मान् कुर्वंतीति तदृहतयः चर्मकोशा इव वृथा श्वासा भवंतीति नानुग्रहात्सृष्टितो भोगमोक्षौ
त्वां च न भजंते ततः कृतघ्ना एव ते नरकपतितक्षमा निंद्या एवेति भावः अपिचात्मसुखादिरूपत्वादपि त्वय्येव प्रीतिरुचिता तदभावे तु तथैवेत्यभिप्रेत्याहुः
पुरुषेसादि अत्र यत्त्वमिति प्रत्येकं संबध्यते तथा च यः पुरुषविधः पुरुषस्यान्नमयादेर्विधेव विधा आकारो यस्य स प्रमाता त्वमेव तथा यः सदा
त्मनान्वेतीत्यन्वयो यः सर्वानुस्यूतः सन्पदार्थस्त्वमेव अन्नमयादिषु वरम आनंदमय आनंदप्रचुरो यः सत्त्वमेव सदसतः परं कार्यकारणातीते
दृष्टरूपं त्वमेव दृश्येषु यदवशेषं सर्वबाधावधिभूतं ऋतं सत्यं सर्वजगज्जन्मादिधिष्ठानं तदपि त्वमेव अतः परिपूर्णे त्वय्येव भक्तिरुचिता त्वद्भक्तौ
कृतार्थतायास्तदभावे चाकृतार्थताया इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिरित्यादिश्रुतिप्रमाणसिद्धत्वादिति भावः ४
एषु अवशेषं ऋतं यत्तत्त्वमसीत्युक्तौ तत्त्वाख्योपायं लीलावतारेश्वरपरब्रह्मोपासनाभेदेन त्रिविधमाहुः उदरमिति तत्र तावदुदरं

ब्रह्मेति शार्कराक्ष्या उपासते हृदये ब्रह्मेत्यारुणयो ब्रह्माहैवता इह ऊर्ध्वं त्वेवोदसर्पत्तच्छिरोऽश्रयत इति श्रुत्युक्तमाधमाह तत्र शार्क
राभिनिर्दिष्टं शार्करं ब्रह्मोदरं तत्रोक्षिप्त दृष्टिर्येषां ते शार्कराक्ष्याः अस्य प्रातिपदिकं कूर्पं दृशः कूर्पं सूक्ष्मं दृष्टुअक्षि येषां ते तथा सूक्ष्मदृशः।
लीलाविग्रहाद्युपासनारुचय इति यावत् अभिवर्त्मसु आर्योपासनामार्गेषु ये कूपदृशस्ते न कात्मतां मे स्पृहयंति केचित्
मत्पादसेवाभिरता मदीहा इत्युक्तदिशा उदरमल्पं परिच्छिन्नं लीलाविग्रहोपाधिकं भगवंतमुपासते भजंति तस्य रसरूपत्वात् आरु
णयस्तु अरुणवद हत्वस्य प्रकाशस्य मुनेः पुत्रास्तु जिज्ञासवो दहरं सूक्ष्मं हृदयं हृदयायतनमीश्वरं अंतर्यामिणमुपासत इ
त्यनुषंगः दहरं विद्धि नाडि परिसरपद्धतिमिति परितः सर्वतः सरणं गमनं कामचारः सर्वकामावाप्तिः पद्धतिर्मोक्षमार्गे
स्तयोः प्रापकत्वात् परिसरपद्धतिर्दहरस्तेषां सर्वेषु लोकेषु कामचारो भवति एतेनैव का हृदयस्य नाड्यस्तासां मूर्धानम
भिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्न्या उत्क्रमणे भवंतीति दहरोपास्तिफलं श्रुतेः तस्मादिदमत्र पर्यवसितं तत्र
च्छत्युपासकानां तत्तन्मूर्तिसांनिध्यमंतर्याम्युपासकानां तु ब्रह्मलोकानां क्रमेण क्रममुक्तिरिति साक्षान्मोक्षोपायमाह हेऽनंत
त्रिविधपरिच्छेदशून्य तव धाम स्वरूपं ततः सोपाधिकाद्रूपात् ऊर्ध्वं तद्वत् अतिक्रांतं शिरः परमं शीर्यते नश्यतीति शिरउ
परं५ पाधिस्ततः परमं निरुपाधीत्यर्थः। शिरसि वेदांते तात्पर्येण प्रतिपाद्यं वा इह अस्मिन्नेव देहे यद्धाम समेत्य प्राप्य कृतांतमुखे मृत्युमुख
रूपे संसारे पुनर्न पतंति न तस्य प्राणा उत्क्रामंति अत्रैव समवनीयंते ब्रह्मैव सन् ब्रह्माप्येतीत्यादिश्रुत्या ब्रह्मविदां साक्षादेव मुक्ति
प्रतिपादनात् युक्तं चैतत् भूतकर्मणो दाहाद्भव्यकर्मणश्चानाश्लेषात् प्रारब्धस्य तु भोगेनोपक्षयात् संसारे प्रपतने हेत्वभावादित्यलं
विस्तरेण ५ निरुपाधितोऽपि त्वं स्वीयमैश्वर्यं प्रकटयितुं विविधावतारैर्विहरसीत्यभिप्रेत्याह स्वकृतेति स्वेन कृतासु परिगृहीता
सु विचित्रयोनिषु नानाविधमूर्तिषु मत्स्यादिषु विशन्निव प्रकटः निरवयवस्य मुख्यप्रवेशायोगात् तरतमतः प्रकाशितारतम्ये

नदीप्यसे कथं अनलवत् यथाग्निरल्पेउपाधावल्पप्रकाशो महति महाप्रकाशस्तद्वत् किमर्थं हेतुतया भावार्थः विवक्षि
तः परित्राणाय साधूनां विनाशाय च दुष्कृतां धर्मसंस्थापनार्थाय संभवामि युगे युगे इति स्वोक्तहेतोरित्यर्थः एतेनाखंडा
नंदाद्वितीयस्य निरुपाधिकस्य ब्रह्मणोऽवतारादिभावे न युक्त इति निरस्तं तथाहि सामर्थ्यविरहात् किंवा प्रयोजनविरहात्
वा न युक्त इत्यभिमतं तत्र नाद्यः परमेश्वरत्वभंगप्रसंगात् सर्वसमर्थस्यैव परमेश्वरत्वात् नापि द्वितीयः भक्तानुग्रहस्यै
व प्रयोजनत्वात् ननु तेनैव ब्रह्मेह रेति न्यायेन संकल्पमात्रेण भक्तानुग्रह उचितो न तु मत्स्याद्यवतारक्लेशो न तत्राह स्वकृता
नुकृतिरिति स्वेन कृतायामर्यादाया अनुकरोतीति तथा स्वकृतमर्यादापरिपालक इत्यर्थः स्वभाव एवायं सतां मत्स्वोक्ति
परिपालनं ननु तर्हि ऐश्वर्यतारतम्यस्य क्वचिद्विश्रान्तत्वाद्यत्र विश्रान्तिः स एवोपास्यस्तत्राह अथ वितथास्विति अये त्वुप
सारं भार्थः वितथास्वेतं भावतिरोभावयोर्मत्स्यसु अम्बुयोनिषु मत्स्यादिविग्रहेषु तावतारिणो धामस्वरूपं प्रकाशं अवित
थं पूर्णं अतः समं अवतार्यभिन्नमेव तारतम्यवर्जं पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते पूर्णस्य पूर्णमादाय पूर्णमेवाव
शिष्यत इति श्रुतेः अतो विरजाधियो मोक्षेऽपि वीतरागमतयोऽन्वयं तितव लीलावतारभक्तिं प्राप्नुवंति मय्यावेश्य मनो
ये मां भक्तियुक्ता उपासत इत्यादिना सगुणभक्तिरुक्ता त्वा केवलिनस्तु अभिक्षिपण एवं वो विगतव्यवहारस्ता मान्याएकरसं पर
मात्मानमेव निरुपाधिकं भजंत इत्यर्थः अथ वा तव धामसु उपाधतीतं तर्हि कथं सेव्यसेवकभावस्तत्राह स्वकृतेति स्वसृ
ष्टविविधदेवमनुष्यतिर्यगादिदेहेषु हेतुतया अधिष्ठानतया प्रागेव विद्यमानत्वेन नु स्वप्रवेशायोगात् विशन्निव वर्त्तमा
नः तरतमतो न्यूनाधिकभावेन शास्त्रशास्यपूज्यपूजकभावादिना प्रकाशसे अत एवोक्तं विद्याद्युत्तमदेहेषु प्रविष्टो देवता
भवेत् मर्त्याद्यधमदेहेषु प्रविष्टो देवतां भजेदित्यादि नित्यमुक्तस्य किमिति जीवभावस्तत्राह स्वकृतानुकृतिरिति स्वकृ
तानि कर्माण्यनुकरोतीति तादृश इत्यर्थः ननु सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मेति श्रुतेः प्राग्द्वैतावधारणान्ना

स्तितत्काले कर्मादियेन तदुपपद्येनेतिचेन्न सृष्टिप्रवाहस्यानादित्वेनादोषात् तदुक्तं नकर्माविभागादितिचेन्नाना
दित्वादिति एकरूपस्याप्युपाधितएवतारतम्यदृष्टांतः अनलवदिति अथअतोवितथाप्युभिथ्याभ्रतास्तुयोनिष्प्रवि
तथंसत्यं यतःसममविज्ञेयो अतःसत्यंतवधामस्वरूपं विरजधियोनिर्मलमतयोऽन्वयेतिजानंति यतोऽपि
पएयवोविगतव्यवहाराःऐहिकामुष्मिकफलाभिसंधिरहिताइत्यर्थः अप्रच्युतस्वभावस्यतवज्ञानेसाधनचतु
5 ष्टयसंपन्नाएवसमर्पीनान्येइतिभावः अविशेषत्वादेवैकरसंसच्चिदानंदघनंस्वतत्तारतम्यवर्जं अतएवनो
पास्यत्वानुपपत्तिरितिसंक्षेपः १६ ननुयद्येकरसंब्रह्मतर्हि कथंयआत्मनितिष्ठन्नात्मानमंतरोयमयतीति
श्रुतौनियम्यनियंत्रादिभावादिकंश्रुतावुच्यते तत्राह स्वेति संकल्पसंसृष्टेषुदेवनरतिर्यगादिषुअमीषुदृश्य
मानेषुपुरुषंपुरिशयं अखिलशक्तिधृतस्तव परास्यशक्तिर्विविधैवश्रूयतइतिश्रुतेःसर्वशक्तिमतस्तवपरमेश्वर
स्यांशकृतं घटाकाशवदंशमिवकृतं निरवयवस्यवास्तवोंऽशोनास्ति विभागयोगात् अविद्ययानियम्यत्वादिभेदवैत
मितियावत् वदंतिश्रुतयःस्मृतयश्च पुरश्चक्रेद्विपदःपुरश्चक्रेचतुष्पदः पुरःसपक्षीभूत्वापुरःपुरुषआविशदिति ममै
वांशोजीवलोकइत्याद्याः अस्यजीवस्यपूर्वश्लोकोक्तेकरसब्रह्मभावस्योपपादनायतात्विकंरूपमाह अबहिरंतरसंवरणं
नसंतिबहिरंतरसंवरणंचयस्यते अस्यबहिर्नास्तिमहत्वात् नांतरंअणुतमत्वात् संव्रियतेआच्छाद्यतेस्वरूपमनेनेति
संवरणंस्वरूपावरकमज्ञानंतदस्यनास्तिनिरावृतत्वात् तथाचश्रुतयः अणोरणीयान्महतोमहीयान् नतस्यास्तिकश्चि
तेत्याद्याः अतएवसमानस्वभावत्वेनलोकानवगतेसप्रयोजनत्वेनूचतासर्यवंतंब्रह्मणिदाशकितवाद्यभेदंवदंत्याथर्व
णिकाः ब्रह्मदाशाःब्रह्मदासाःब्रह्मेमेकितवाइति दाशाःकैवर्ताः दासाःसेवकाः कितवाद्यूतकाराः अत्रहीनजीवाभेदप्रदर्शे

नेजीवमात्राभेदसूचनाय इत्थं च तत्त्वमस्यहं ब्रह्मास्मीत्याद्यभेदश्रुतिस्तात्त्विकाभेदतात्पर्यवती भेदश्रुतिस्त्वतात्त्वि
कभेदानुवादमात्रमितियुक्तमेकरसमिति इतिशास्त्रयुक्तिभ्यां निर्णीजीवानां गतिमुक्तेर्मोक्तृपरमानंदरूपा वि
विक्तनिर्धारिक वचः शास्त्रज्ञास्तादृशब्रह्मस्वरूपावाप्तये भगवतो नारायणस्याङ्घ्रिमुपासते सेवंते तत्कृतो वसकेला
तरायनिरस्त्या तादृशफलस्य शास्त्रोक्तत्वात् यथाह भगवान् स्तंजलिः ततः प्रत्यक्चेतनाधिगमोप्यन्तरायाभावश्चे
ति अंघ्रिशिरिंफस्त्वेवोपासनास्वरूपं फलं चाह निगमेति निगमोक्तकर्मणां समर्पणस्थानं मद्धर्मिषिकर्माणि कुर्व
न्सिद्धिमवाप्स्यसीति स्मृतेः भवत्प्रीत्यर्थं कर्माणि कर्तव्यानीत्यर्थः अभवं भवनिवर्तकं श्रवणकीर्तनादिक्रमेणैव विश्व
सिताः श्रद्धालवः श्रद्धावान् लभते ज्ञानमिति स्मृतेः इदं मुख्यमधिकारिविशेषणं इह वेदवेदिदर्शनस्यमक्तिनचे दिहावेदी
न्महती विनष्टिरिति श्रुतेर्मर्त्यलोक एव साधनानुष्ठानं घटते नान्यत्रेति दर्शयितुं भुवीत्युपलक्षणं भिदं प्रथमे वयसीत्य
पि बोध्यं भुवि मर्त्यलोके प्रथमे वयसि श्रद्धया भगवद्भजनमाचरन्निह जन्मन्येव भवबंधाद्विमुक्तो भवतीति निर्गलितोर्थः।
तदुक्तं कौमार आचरेत्प्राज्ञो धर्मान्भागवतानिह दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदमिति ७ भगवति सर्वकर्मार्पणरूपलक्ष
णसाधनभक्तियोगस्य भवबंधनिवर्तकत्वं वर्णितं तच्च भगवत्प्रसादतो ज्ञानद्वारा प्रेमभक्तिस्तु स्वतः पुमर्थ इत्यभिप्रेत्याह दुरि
ति दुरवगमं दुर्बोधं आत्मनस्तत्त्वं याथार्थ्यं तस्य निगमाय ज्ञापनाय तव ग्रहणेन आत्ततनोः स्वीकृतशरीरस्य चरितवेदोद्वारा
दितदेव महाम्बुरतिशयफल्गुहेतुत्वात् अमृतवन्मधुरत्वादधिवदनन्तत्वाच्च महामृताब्धिस्तत्र परिवर्तावगाहस्तेन परिश्रमणाः प
रिवर्जिताः प्रतिपत्या मर्त्या शोकमोहाद्यायासो येस्ते तथाभूताः कृतकृत्याः केचिद्धित्वा ईश्वरतेत्वच्चरणसरोजेरमा
णा हंसा इव हंसाः निरस्ताज्ञाना सत्यक्तसंसारास्तेषां कुलं समूहस्तेषां संगेन विसृष्टागृहाय येस्ते तथाभूता भगवत्सरयणा अपव
र्गमोक्षमपि न परिलषंति नेच्छंतीत्यर्थः रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति श्रुत्या शर्करातृप्तो जिनो रिव मोक्षभक्तिसुख

6

मुमुक्षूणां मोक्षः पुमर्थः भक्तानां तु भक्तिरेव काम्यमानस्यैव पुमर्थत्वात् तत्र मोक्षसाधनं ज्ञानं प्रेमसाधनं तु तद्गुणगणागारि
मश्रवणादिकमुक्तं तदुभयश्रेष्ठे नृदेहेति तद्दिति इदं कुलायं कोटरीयत इति कुलायं शरीरं त्वदनुपथं च त्वदनुवर्ति त्वत्सेवानुकूलं
आत्मसुहृत्प्रियवच्चरति आत्मवत्स्वायत्तत्वात् सुहृत्प्रत्युपकारमनपेक्ष्योपकर्ता प्रियः प्रत्युपकारमनपेक्ष्योपक्रियमाणः
पुत्रादिस्तद्वच्चरतीति प्रतिस्वाधीनतयानुवर्तते मोक्षानुगुणं प्रियं च शरीरमस्तीत्यर्थः तथात्वमनुमुखे भक्तानुग्रहीतुं अतएव
वर्तिते मित्रे प्रिये च निरुपधिप्रेमास्पदत्वात् प्रियत्वादेवात्मनि प्रतीचि सुसेव्येऽपीत्यर्थः अहो आश्चर्यं बत खेदे नरं मतितद्गुणगान
द्विना नरमेते कुतः असदुपासनया असङ्गतरूपादिवस्तुग्राम[illegible] ×सती× तं अतएवात्मनो हनः आत्मानं नानादुःखेषु
पातनात् घ्नन्ति हिंसन्तीति तथा यदनुशयाः यस्या असदुपासनाया अनुशयो वासनायेषां ते भोगलम्पटाः उरुभये महाभ
ये यति संसारचक्रे भ्रमन्ति परिवर्तन्ते अतएव कुशरीरभृतः कापुरुषास्ते कुत्सितं शरीरं बिभ्रतीति वा श्रूयते च ज्ञानभ
क्तिमार्गविमुखानां निन्द्या गतिः असुर्या नाम ते लोका अन्धेन तमसावृताः तांस्ते प्रेत्यापि गच्छन्ति ये के चात्महनो जना इति।
अत्रात्महन इत्यनेन कर्मिणोऽपि गृह्यन्ते यत आत्मानं प्रीतिहि सति अपवर्गभोग्यपरमानन्दकृत्स्नभोक्त्रादिभावेनोपवर्णयं
ति अतएव तेऽपि भ्रान्तत्वाज्जन्मनो जन्म व्रजन्तः कापुरुषा एवेति भावः ॥ एवमभक्ताननुक्रोश्य भक्तिं स्तौति निभृतेति नि
भृता निगृहीताः मरुत्प्राणाः मनः प्रसिद्धं अक्षा इन्द्रियाणि येस्ते निभृतमरुन्मनोक्षाः ते च ते दृढयोगयुजश्चेति दृढयो
गयुजस्ते तथा मुनयो हृदि यत्तत्त्वमुपासते तत्तत्त्वं द्वेषपूर्वकं नित्यं चिन्तयन्तोऽरयः कंसशिशुपालादयोऽपि ययुः प्रा
पुः कुतः स्मरणात् कीदृशेन न्यायेन ध्यानमात्रेण ध्येयसारूप्यप्रापकेन भक्तिरेवेत्यर्थः यथोक्तं सप्तमे गोप्यः का
माद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः सम्बन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं प्रभो इति तथा प्राहेतिशेषः अतएव स्त्रियो गो
प्यादयः उरगेन्द्रेत्यादि फणीन्द्रदेहसदृशयोर्भुजदण्डयोराश्लेषसुखलिप्सया विषक्ता संलग्ना धीर्यासां ता अपि यन्मु

नयउपासते तद्देवतत्वंययुरितिसंबंधः समदृशः सममपरिछन्नंब्रह्मपश्यंत्योवयंकृत्याभिमानिन्यो देवताअपिते
सभाएवकृपाविषयतयायतेऔंघ्रिसरोजसुधाःअंघ्रिसरोजं पादपद्मंसुधेवामृतमिनातिवक्ष्यमाणासोताः अयंभावः
इत्थंभूतस्तवस्मरणानुभावःयेयोगिनस्त्वांहृदयेध्यानमुपासते येचद्वेषेणध्यायंति प्राप्नुवयंतवस्वरूपंजानंत्यःश्रे
मभक्त्याचभक्तियोरागतोभक्तास्तानवीनपिलामेवप्रापयतीति इदमत्रपर्यवसितं तंयथायथोपासतेतथैवतःप्रेत्यभ
वति यंयंचापिस्मरन्भावं त्यजत्यंतेकलेवरं तंतमेवेतिकौंतेयसदातद्भावभावितइत्यादिश्रुतिस्मृतिभिरंत्यप्रत्य
यस्यसमर्पमाणसारूप्यप्राकट्यत्वेबोधते अंत्यप्रत्ययश्च यथाकयोचित्तीव्रध्यानायत्नोनकेवलंभक्त्यायतः इत्य
चमुच्यतेशिशुपालादीनामपिस्मरणाभ्यासगौरवादंतकालेऽपि ध्यानलाभान्मुक्तिः ननेवंतर्हिसंततानुष्ठितभ
गवद्भजनस्यापिपुरुषस्यदृष्टसामग्र्याइवदृष्टप्रारब्धस्यापिदुर्वासनोद्बोधकत्वस्यसंभवाद्दुर्वासनयामाहात्म्यादनुद्भाव
प्रसंगोदुर्वारः श्रूयतेचभरतस्यराजर्षेस्तथाचावसानसमयभवस्मरणस्यप्रायध्यायत्तत्वसंभवेनेदानींतनानामंतकालभवद्
वीसनोद्बोधभ्रमशंकयानाभ्यासप्रसंगोदुर्वारइतिचेत् अत्रवदंति बहुतरोपदेशेऽपिसदसदभ्यासाप्रवृत्तेर्बहुपदेशोपितत्रप्रवृत्तेर्विल ५१·
क्षणेकेचित्संचितसदसत्कर्मणोवासनाप्रवर्त्तकेभवतः बहुतरोपदेशेऽपिसदसदभ्यासाप्रवृत्तिर्बलवत्तरप्रतिबंधकाद्भवतीतितिनि
र्णेयं। एवंचप्रतिबंधकाभावेसतिप्रवर्त्तककर्मोन्मुख्याभावेपि बहुतरोपदेशादिभेदेनसदसदभ्यासोभवेत्तथाच प्रतिबंधकाभावेसति
सत्पुरुषोपदेशभवभगवदनुचिंतनेनसंततभवेनबलवत्तरविरुद्धकर्मणामप्यभिभवादवसानकालेभवेनसर्वविरुद्धकर्मणांविना
शादवसानकालाद्धितत्पूर्वविरुद्धप्रारब्धस्याभिभवेनविरुद्धवासनानुन्मेषादंतकालेसत्स्मरणंभवेल्लवेतिनैवानाभ्यासःकार्यःप्रति
बंधकाभावेसतिजायमानभगवदनुचिंतनमसत्संगत्यादिदृष्टसामग्रीसंभवांदुर्वासनांतुनाभिभावयतिनवानाशयति

अत एव भरतस्य विपरीतफलम् असत्संगत्यधीनासद्वासनायत्तं श्रूयते एवं च भरतादावसद्वासनासंगत्यधीनानरप्रारब्धाधी
नेति प्रारब्धायत्तासद्वासनोत्कर्षाशंका नैवाध्यासो विधेयः तथा च पुरुषेण भगवच्चिंतनपरेण दृष्टद्वारा प्राप्यमाणाऽसत्संगतिः परि
हर्तव्यैव। सा च बलवत्तरप्रारब्धेन संभाव्यमानापि सत्संगत्यायत्तसदसद्विवेचनेन भगवच्चिंतने दृष्टप्रयत्नबाहुल्ये सति विरुद्ध
कर्माभिभवात्तत एव सुपरिहरा भवेत् एवं च दृष्टप्रयत्नैः सद्विषयो वश्यं सत्संगत्या संपादनीयः स तत्कर्मपक्षपातिसत्त्वांशस्य प्रब
लत्वेन दृष्टविषयासंपाद्यमानसत्संगत्यधीनसत्त्वोत्कर्षेण भगवच्चिंतनाभिरुच्यादिरूपकादिशासदितरसंगत्यादेरपि निवारणसं
भवात् अत्रायं विभागः। सुकृतदुष्कृतयोर्द्वयोर्मतिदुर्बलत्वे सुकृतं प्रबलं दुष्कृतस्य नैमित्त्यात्तभगवन्नामादिविशेषेणाप्यजामि
लादेर्नाशदर्शनात् असत्संगतिप्रवृद्धासद्वासनाशक्तिरूपदुष्कृतेन भरतादौ सुकृतस्याभिभवमात्रानुभवाच्च तस्मात्सत्संगादिदृष्ट
सामग्रीतो मुमुक्षुरभ्यासेन भगवद्भावनादिसद्वासनामेव समर्जयेत् सा च चरमसमयगतास्यात्तदनुरूपफलानुरूपां संसृतिमुन्मेष
येदेव यदि पुनस्तदा प्राक्तनमसंगत्यधीनं वा किंचिद्दुष्कर्मस्यात्तदनुरूपफलानुरूपामसंसृतिमुन्मेषयेत्तदापि न हानिः। तामसस्यातया
सात्विकस्यार्जितस्याभिभवमात्रेणानंतरं तत्फलदर्शनादित्यास्तां विस्तरः। अधिकं त्वस्मत्कृतशांडिल्यसूत्रव्याख्याने भगवद्भक्तिचंद्रिका
यां द्रष्टव्यं १। ननु तत्त्वज्ञानेनैव मोक्षसंभवे किं सगुणभक्त्येत्याशंक्य ज्ञानदौर्लभ्यमाह कइहेति बत अहो भगवन्निह जगति अग्रसरेषु
वेषु सिद्धेषु त्वां अवरजन्मजयः अर्वाचीनोत्पत्तिनाशवान्कोनुवेदन को पीत्यर्थः ईश्वरस्य पूर्वसिद्धत्वात् अन्यस्यार्वाचीनत्वे च प्रमाणवदन्यज्ञान
कारणाभावमाह यत्तदुद्गादिति यतो भवत ऋषिवंशो उद्गादुत्पन्नः। यो ब्रह्माणं विदधाति पूर्वमिति श्रुतेः। यत्र ब्रह्माणमनुप्रश्चादु
भये ज्ञानेंद्रियाधिपाः कर्मेंद्रियाधिपाश्च उद्गुः आध्यात्मिकाधिदैविकगणा उदगुः। पश्चाज्ञाविता दोनभयरसरंजन्तर्भिर्देवाश्चन विदुः।
यदा तु भगवान्सर्वं प्रपंचमवष्टभ्योपसंहृत्यशय्यीतस्वरूपेणास्ते तर्हि तदा न सत्स्थूलं आकाशादि न चासत्सूक्ष्मं महदादि नोभयं
सदसद्भ्यामारब्धं शरीरादिकं न च कालजवः तन्निमित्तभूतं कालवैषम्यं एवं सति तत्र न किमपि इंद्रियगणाणघटपि न चज्ञापकं शास्त्रम्

पि ज्ञातृज्ञापकयोरभावात्तत्र स्वरूपेऽकिमपि नासीदित्यर्थः। अयं भावः। देहेन्द्रियादिकं प्रतिबन्धकाभावश्च ज्ञानसामग्री तदभावादेव
चात्मज्ञानाभावोऽजीवानां तत्र प्रलये ज्ञानाभावो देहेन्द्रियाद्यभावात् सृष्टौ तु प्रतिबन्धकाज्ञानादि तथा च श्रुतिः नतं विदाथ य इमा जजा
न अन्यद्युष्माकमन्तरं बभूवेति तस्माद्भजनीयानुग्रहद्वारा सकलप्रतिबन्धकनिरसनतोऽर्थहेतुर्भक्तिरेव श्रवणकीर्त्तनादिलक्षणा
सुकरोपादेया भक्त्या भजनीयानुग्रहतो भक्तस्यानर्थनिवृत्त्येष्टसिद्धी लोके दर्शनात् अत एव गीतायामपि मां च योऽव्यभिचारेण भक्ति
योगेन सेवते स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पत इत्यादिना सकलोपाधिनिवृत्त्या ब्रह्मसंपत्तिरूपमोक्षस्य भगवद्भक्तिसाध्य
त्वमेवोक्तमित्यास्तां विस्तरः॥१॥ इतोऽपि ज्ञानं दुर्लभं प्रायउपदिशतामपि भ्रमबाहुल्यादित्याह जनिमिति असतः कारणव्यापारात्
प्रागविद्यमानस्य कार्यस्य जनिमुत्पत्तिं ये वैशेषिकादयः स्मरंति यदंति तेऽआरोपितैर्भ्रमैरेव निःशेषानुपदिशंति असतः प्रागविद्य रुपितेरा७
मानस्योत्पादनासंभवात् अन्यथा शशविषाणस्यापि करणापत्तेः। अपि च यद्यसत्कार्यं स्यात्तदा तत्सर्वं सर्वत्र संभवेत् असत्त्वाविशेषात्।
न च यत्र यस्य प्रागभावोऽस्ति स एव तत्र जायत इति वक्तव्यं तंत्वनुत्पाददशायां पटप्रागभावः कुत्र स्यादिति न च काल इति वाच्यं प्रागभावस्य क्रिया
विरहेण तंतावागमनविरहे तंतुवत्त्वं न स्यात् न चाधिकरणतंतुरूप एव पटप्रागभावस्तत्र ह्यधिकरणत्वाविशेषाद् घटादिप्रागभावरूपता
स्यात् न च पटनिरूपितकारणत्वं नियामकं असतः पटादेर्निरूपकत्वासंभवात् निरूपकत्वस्य व्यवहारजनकत्वरूपत्वात् असतस्तु ज
नकत्वाभावात् ननु मास्तु प्रागभावभेदो नियामकः परं तु यज्जातीयं प्रति यज्जातीयान्वयव्यतिरेकौ दृष्टौ तज्जातीयं प्रति तज्जातीयस्यैव हे
तुत्वमभ्युपेयं नान्यजातीयस्य अतो नातिप्रसंग इति चेत्तर्हि निमित्तकारणानामप्युपादानकारणत्वप्रसंगः। अन्वयव्यतिरेकयोरविशेषात्।
न च यत्र समवायस्तदुपादानमिति वक्तुं शक्यं समवायस्यापि साधनीयत्वात् अथ कार्ये यस्यान्वयस्तदुपादानमिति चेत्तर्हि बीजस्यांकुरोपा
दानत्वं न स्यात् बीजान्वितस्यांकुरस्य क्वाप्यदर्शनात् जीवावयवानामेव तत्रोपादानत्वं अतो न दोष इति तु न सम्यक् भेदाभेदविकल्पग्रासात्
तथाहि बीजावयवा अंकुरावयवेभ्यो भिन्नास्त एव वा। आद्ये तेषामंकुरेष्वननुगतिः स्वावयवत्वाभावात् द्वितीये सांख्यमतप्रवेशः बीजावय
वानामेव संस्थानपरित्यागेनांकुरात्मतापत्तिरिति सांख्यैरभ्युपगमात् एवं येऽपि सांख्यपातंजलास्ते कारणव्यापारात्प्रागपि कारणे सत एव
कार्यस्य पश्चान्नाशकसमवधानेऽप्यसतिमनाशं तिरोधानमात्रं स्मरंति निरन्वयनाशं नेच्छंति सर्वं नित्यं प्रमेयत्वादिति तेऽप्यारूपि

नेऽभेमैरेवशिष्यानप्रत्युपदिशंति निरन्वयनाशनमभ्युपगमे त्रिविधदुःखात्यंतनिवृत्तिलक्षणमोक्षस्यालीकत्वापत्तेः तिरोधानपक्षे
कारणात्मनावस्थितस्यानित्यस्येति न्यायेन दुःखस्य पुनरुद्भवप्रसंगात् तथा च साधुसमर्थितो मोक्षवादः स्यात् अपि च सत्का
र्यवादपक्षे कार्यस्यानित्यत्वप्रसक्त्या सामग्रीवैयर्थ्यप्रसंगः न चाभिव्यक्त्यर्थं सेति वाच्यं जन्याजन्यविकल्पग्रासात् तथा हि
यद्यभिव्यक्तिरजन्या तर्हि सत्कार्यवादबाधः यद्यजन्या तर्हि नित्यत्वप्रसक्त्या सामग्रीवैयर्थ्यदोषतादवस्थ्यं अभिव्यक्तेरप्यभि
व्यक्त्यपेक्षायां तस्यास्तस्यापीत्यनवस्थापातस्मान्नापि किंचिदेतत् सर्वो नित्यानुमानस्य केवलान्वयिधर्मावच्छिन्नपक्षकत्वेनानुपसं
हारित्वाच्च उतापि चात्मनि भिदाभेदश्च सांख्यतार्किकादयः सर्वेऽपि वादिनः स्मरंति जननमरणकरणानां प्रतिनियमादयु
५ गपत्प्रवृत्तेश्चेत्यादियुक्तिभिः तेऽपि भ्रमैरेव शिष्यान्प्रत्युपदिशंति भेदवादस्य श्रुतियुक्तिनिंदितत्वात्तथा हि श्रुतयः तत्वमसि
अहं ब्रह्मास्मि योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः उदरमंतरं कुरुतेऽथ तस्य भयं भवति मृत्योः स मृत्युमाप्नोति
य इह नानेव पश्यति सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेत्याद्याः युक्तयस्तु भेदोऽसन् दृश्यत्वाद्धूमस्त्वात् शुक्तिरजतादिवदि
त्याद्याः तदुक्तं विभेदजनके ज्ञाने नाशमात्यंतिकं गते आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यतीति। अत एव न जननमरणादिव्यव
स्थानुपपत्तिरभिज्ञानात्यागाविघकभेदेनैव तदुपपत्तेः। ज्ञानादूर्ध्वं तु न चाशंकानवकाश इत्यभिप्रेत्याह भगवती श्रुतिरपि यत्र हि द्वैतमि
व भवति तदितर इतरं पश्यति तदितर इतरं शृणोति तदितर इतरं मनुते तदितर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कंप
श्येदित्यादि। अत एव येऽपि मीमांसकाः पुमान् त्रिगुणमयः सुखदुःखमोहप्रचुर इति हेतोर्विपर्णव्यवहारं कुर्वंतं सततं प्रवाहनित्यं नक
दाचिदनीदृशं जगदिति स्मरंति सुखदुःखादिभोगस्य सजातीयेच्छाद्वारा कर्मणि प्रवर्त्तकत्वेन कर्मार्थित्वात्कर्मणां चावश्यंभावि
फलत्वेन भोगजनकत्वान्मध्ये विरामासंभवादित्यादियुक्तिभिर्वदंति तेऽपि भ्रमैरेव शिष्याननुपदिशंति अयं भावः प्रलयसाध
कयुक्त्या प्रवाहनित्यत्वे व्यवहारस्य बाधितं स्वाभाविकत्रिगुणमयत्वे पुरुषस्यानिर्मोक्षप्रसंगश्च घटे यावद्रूपनाशवदशेषदुःख
नाशरूपमोक्षस्य धर्मिनाशमंतरेणासंभवात् तदुक्तमीश्वरगीतायां यथात्मा मलिनोऽस्वच्छो विकारी स्यात्स्वभावतः नहि तस्य

भवेन्मुक्तिर्जन्मांतरशतैरपीति तस्मात्ते अंधस्येवांधलग्नस्य विनिपातः पदे पदे इति न्यायेन स्वयं नष्टाः परानपि नाशयंतीति तादृङ्मोहाक्रां
तिः अविद्यायामंतरे वर्त्तमानाः स्वयं धीराः पंडितंमन्यमानाः जंघन्यमानाः परियंति मूढा अंधेनेव नीयमाना यथांधा इति यथात्र श्लोके आ
स्तिकभेदवादिनो निराकृतास्तथा नास्तिकवादनिराकरणमपि बोध्यं तथाह्यसतः कारणात् अर्थात्सितोऽसतो वा कार्यस्य ज
न्मि माध्यमिकाः स्मरंति येच योगाचारवैभाषिकसौत्रांतिकाः सतोर्थक्रियाकारिणो ज्ञानैकलक्षणात्मादेर्मूर्तिं प्रतिक्षणविनाशं स्मरं
ति उताप्यिच सर्व एव ते आत्मनि भिदां आलयविज्ञानप्रवृत्तिविज्ञानादिधाराभेदं स्मरंति येच क्षपणकादयः विपर्णं व्यवहारं परिमे
श्वरपरिणामत्वात् तेस्वरूपतः सत्यं वदंति येच लोकायतिकास्त्रिगुणमयः पुमानिति देहावच्छेदेनैव रागद्वेषमोहाद्युत्पत्तेर्देह एव रागद्वे
षमोहराशिमयः पुमान् जीव इति वदंति तेपि भ्रमैरेव शिष्यानप्युपदिशंति अयं भावः तत्र नासद्वादः साधुः कथमसतः सज्जायेते
त्यसद्धेतुककार्यासंभवश्रुतेः नवाऽसतः शशशृंगस्य विकारो विवर्त्तो वा धनुः क्वचिद्दृष्टं अप्रकृतिकविकारासंभवात् निरधिष्ठा
नभ्रमासंभवात् असंतासतो जन्मासंभवाच्च एवं योगाचारादिमतमपि न साधु अत्यंतसतो निरन्वयनाशायोगात् सतो घटादेः क्षणिक
त्वादर्शनेन सत्त्वस्य क्षणिकत्वाव्याप्तेः क्षणिकत्वे कार्यकारणभावबाधप्रसंगाच्च नचेष्टापत्तिः अन्वयव्यतिरेकविरोधादिति दिक्
एवं क्षपणकमतमपि न साधु व्यवहारस्य दृश्यत्वेन मिथ्यात्वसाधनात् कूटस्थत्वेन परिणामित्वायोगात् जगद्भ्रमाधिष्ठानत्वस्यैवाभ्यु
पगमात् एवं लोकायतिकमपि न साधु देहस्यैवात्मत्वे कृतनाशाकृताभ्यागमप्रसंगात् जातमात्रस्य स्तन्यपानादौ प्रवृत्तिश्च न स्यात् स्तन्ये
ऽभीष्टसाधनत्वाग्रहादित्यादि स्वयमूह्यं ननु भ्रमैरेव तदुपदिशंत्येतदेव कुतोऽवगतं तत्राह भिद्यतेऽबोधकृतेति भिद्यनामभेदोऽर
यद्यस्मादवबोधेन भावरूपेणाज्ञानेनाभिन्नादिपदबोध्ये परस्यात्मभाववाचित्वं तेनावबोधेन कृता स्वप्नद्रष्टरीव स्वरूपाज्ञानकृते
वेयं जगत्कल्पनाऽनिर्वाच्यानतात्विकी तस्मात्तत्र सदसद्वादप्रवृत्तिर्भ्रमनिबंधनैव वादिनामिति मंतव्यं ननु स्वप्नद्रष्टुर्यथा मायिकारणीभू
ताज्ञानाधीनतया नीश्वरत्वं स्यात्तत्राह त्वयिनेति सअवबोधस्त्वयि ब्रह्मरूपाश्रयेन संभवेन्न संभवति कुतः ततः परत्र अवबोधात्परस्मिन्

आदित्यवर्णं तमसः परस्तादिति श्रुतेः अत एवावबोधरसे भुञ्चिन्मात्रे तथा च श्रुतिः यथा सैंधवघनोऽनंतरोऽबाह्यः कृत्स्नो रसघन एवं वा अय
मात्माऽनंतरो बाह्यः कृत्स्नः प्रज्ञानघन इति स्वप्रकाशत्वेनाज्ञानाश्रयत्वविरोधादज्ञानावभासकत्वाच्च तस्य ज्ञानसंबंधाभावे नापि नास्ति न चे
श्वरस्यैवेति वाच्यं आवरकत्वेनाज्ञानपदवाच्याया ईश्वरेऽप्ययोगात् अत एव कार्यकारणयोरेकाश्रितत्वनियमाज्ञ्म भवति जीव एवैवेति वदंति तदपि न
सम्यक् । जीवत्वस्याज्ञानकृतत्वेन जीवे तदयोगात् तदुक्तं पूर्वाब्धिवन्नमसो हि पश्चिमो नाश्रयो भवति नापि गोचर इति तस्मादिदमभिप्रेतं नाज्ञानं
१ नवाश्रयाश्रयिभावो नापि प्रपंचो नवा तदुत्पत्तिविनाशौ किंतु ब्रह्मैवेदं सर्वमिति तथा च श्रुतयः ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म द
क्षिणतश्चोत्तरेण अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठमित्याद्याः एतदुपपत्तिप्रकारश्चोक्तोऽस्मद्गुरुभिः आदित्यादेरभा
वो विलसति पुरतो यः पदार्थप्रकाशो दृष्टो सोऽस्य स्वरूपः सुखमपि नियतं तत्त्वमेवासौ स एव आदित्यादेरपीत्थं सच्च भयति ततः सच्चिदानंद आ
त्मा सत्यात्तस्मात्ततोऽन्यज्जगदिति सुधियो दृश्यमानं तदेव १ इत्थं प्रत्ययशीतत्वे तस्मिन्नरे यत्नानपेक्षात्तत्तोनोत्पत्तिर्नीतिरोधबंधनभावा
नो यामुमुक्षादिकं सर्वमिन्यखिलेश्वरे परं तरे योगी वनानात्मनास्त्वेच्छाक्रीडनके परे कथमहो जल्पाविकल्पामुकुः २ १२ ननु यदि स
र्वं ब्रह्मैव तर्हि कथं मातृमानमेयादिकमशेषं भेदनिबंधनो लौकिकवैदिकव्यवहारस्तत्राह सद्वेति आमनुजात् त्रिवृन्मनः असदपि त्वयि
सदिव भातीति संबंधः आद्यत्पभिविद्याबाधूः मनुजो जीवस्तमभिव्याप्य तत्त्वसदिति सर्वं मानमेयादिकं मनः कल्पनामात्रमपि त्वय्यधिष्ठाने ब्रह्मणि
स्वमहदशनिजं विजीवादि द्विविधं भाति मातृमानमेयानां वस्तुतस्त्रैकालिकप्रभावप्रतियोगित्वेऽपि स्वप्नवद्व्यवहारोपपत्तिरिति भावः मनो विशि
नष्टि त्रिभिः सृष्टिस्थितिप्रलयैः सह नर्तनशीलत्वेति त्रिवृत् ननु स्वप्नवद्व्यवहारश्चेद्बुधानां तद्वदेव सज्जुप्सेतेत्याशंक्याह सदिति आत्मविदः इदं मानमेया
दिकं अशेषेण न हि प्यत इत्युपशेषं यथा स्यात्तथा सबाधं सत्स्वरूपमभिमृशंति जानंति कुतः आत्मतया आत्माभेदेन हेतुनेदं सर्वं यद्यमात्मेत्यादिश्रु
तेः अयं भावः समाधौ द्वैतदर्शनं नास्त्येव व्यवस्थानेतु व्यवहरंतो पि ब्रह्मबुद्ध्यैव व्यवहरंति यथोक्तं विष्णुपुराणादौ वनानि विष्णुर्भुवनानि विष्णुर्गिरिश्च
विष्णुर्गिरयश्च विष्णुः न घसत्सु तुम्बश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्येत्यादि अतोऽस्थितेषां व्यवहारलोपः नेप्सस्माधेरभावादिति ननु तर्हि स्व
रूपानंदमग्नास्ते मातृमानमेयबुद्धिं कुतो न त्यजंति तत्राह नहीति हि कनकस्येति दृष्टांतार्थमुक्तं तदात्मतयेति हेतुः यथा कनकार्थिनः कनकस्य विकृ
तिं कुंडलादिरूपां कनकात्मतया न त्यजंति एवमात्मविदोऽपि प्रारब्धकर्मावष्टब्धस्वाविद्याविजृंभितदेहेंद्रियादिनिरीहापिनः स्वाविद्याविकृतिं मातृ
मानादिव्यवहृतिं च कश्चमभिवदनुवर्त्तमानो दृष्टिसृष्टेरभ्युपगमेन स्वात्मरूपां न त्यजंतीत्यर्थः भवंतु ते स्वरूपानंदमग्नास्तथापि तेषो द्वयप्र व घावत्मा

रर्थं स्वाविद्यासंस्कारान्मात्मानादिभेदव्यवहारोनुवर्त्तत एव भिक्षाटनादिषु तावता च न हानिः यतः स्वकृतमिदं मन आदि विसृज्य अनुप्रविष्टं च भोक्तृ
रूपमात्मतयैव व्यवहारकालेप्यवसितं निश्चितं तदुक्तं अनुसंदधते वात्र भोजनादौ प्रवर्त्तितुं शक्यते त्येन विक्षेपाभावादाश्रु पुनः
स्मृतेः। न च विस्मृतिमात्रान्नानर्थः किंतु विपर्ययात् विपर्ययं तु न कालोस्ति झटिति स्मरतः क्वचित् नन्वेवं विधश्रोतयोक्तिकविना
रेण ब्रह्मावगंतुं शक्यं ज्ञानेन च तस्याज्ञाननाशोपि सुशकः कृतं भक्त्येत्यत आह तवेति येऽखिलसत्त्वनिकेततया तव परिचरं
ति ते उत निर्ऋतेः शिरः पदा आक्रमंतीत्यन्वयः ये पुरुषधौरेया अखिलसत्त्वनिकेततया अखिलानि सत्त्वानि निकेतो यस्य सत
तिते उत निर्ऋतेः शिरः पदाऽऽक्रमंतीत्यन्वयः ये पुरुषधौरेया अखिलसत्त्वनिकेततया अखिलानि सत्त्वानि निकेतो यस्य सत
थातस्य भावस्तत्ता तया सर्वभूताधिवासतयेत्यर्थः तव त्वां कर्मणि षष्ठी परिचरंति ईश्वरो जीवकलया प्रविष्टो भगवानिति प्रण
मेद्दंडवद्भूमावाश्वचांडालगोखरमिति स्मृत्युक्तप्रकारेणोपासते उत तेपि अपि ना ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सर
सिजासनसन्निविष्टः केयूरवान्मकरकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्र इत्यादि स्मृत्युक्तप्रकारेण लीलावतारवि
तकाः तथा तत्सवितुर्वरेण्यमिति न्यायेन निर्गुणब्रह्मचिंतकाश्च निर्ऋतेर्मृत्योः शिरो मूर्ध्नि पदाक्रमंति मत्यो मूर्द्धिपादं दधति संसा
रान्मुच्यंत इति यावत् ननु तमेवेत्यादिश्रुतौ ज्ञानादेव मोक्षः श्रूयते ज्ञानं च वाक्यार्थस्य ब्रह्मणः श्रुत्या पदपदार्थाधिगमेव भवत्यतः किं भ
क्त्येत्याशंक्याह परीति तान भक्तान्विबुधानपि विदुषोपि शिरः श्रुति वाक्यं त्वा परि ययसेव भासि प्रेमपर्यवसायित्वं विना तत्त्वमित्युक्त
श्रिज्यविशेषत्वादिति भावः। अन्वयव्यतिरेकाभ्यां भक्तेरेव पुमर्थत्वं द्रढयति त्वयीति त्वयि भगवति सच्चिदानंदघनेऽनंतकल्याणगुणैक
तं सौहृदं प्रेम येस्ते खलु निश्चितं पुनंति पवित्रयंत्यन्यान्विध्वस्तो गोपदेशादिभिरिति शेषः नये विमुखाः। भगवद्भक्तिरहितास्ते तद्धतय
इव स्वात्मानमपि न पवित्रयंति कुतोन्यानिति भावः श्रवणादिभिर्ज्ञाप्राप्तज्ञाना अपि भगवद्भक्तिं विना भगवत्प्रसादाभावेन मुक्त्युपधा
यकुधियोऽसंभवान्न मोक्षं लभं॰ ते भगवद्भक्तौ तु लभंत एव तत्प्रसादेन तादृशधियामोक्ष इत्यत्र न कस्यापि विवादः देहांते देवः परं ब्रह्मता
रकं व्याचष्टे यमेवैष वृणुते तेन लभ्यः भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरमित्यादिश्रु

हेतु५

प्रेमा माहात्म्यज्ञानत एव भवतीति माहात्म्यं वदंति त्वमिति भो भगवंस्त्वमकरणाकरणसंबंधरहित एव स्वराट् स्वेनैव राजसे आनिंद्रिय ए
वसन्स्वस्वरूपप्रकाशेन सर्वमवभासयसीति भावः अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः स वेत्ति वेद्यं न च तस्यास्ति वे
त्ता तमाहुरग्र्यं पुरुषं महांतमित्यादिश्रुतेः यद्वा न संति करणानि सृष्टिक्रियायां महदादिस्थानीयानि यस्य सोऽकरणः अतः सृष्टेः प्राक्त्वेनैवैका
द्वितीयेन स्वरूपेण राजत इति स्वराट् आत्मा वा इदमेक एवाग्र आसीदित्यादिश्रुतिभ्यः एवंविधः प्रभुः केवलोऽप्यखिलकारकशक्तिधरः अखिला
कारकाणि क्रियाणि करणानि कर्तृकरणसाधनानीति यावत् शक्तिः कार्यजननसामर्थ्यं धारयतीति तथा परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबल
क्रिया चेति श्रुतेः केवलात्त्वत्त एव सर्वमुत्थितमित्यर्थः अतो अनिमिषा इंद्रादयो देवास्तत्र ज्या विश्वसृजस्तुभ्यं बलिं पूजोपहारमुद्वहं
ति प्रापयंति त्वां परमेश्वरं नमंतीति यावत् यं सर्वे देवा नमंति मुमुक्षवो ब्रह्मवादिनश्चेति श्रुतेः। किमिति नमंति नहि प्रयोजनमुद्दिश्य विना प्रवृ
त्तिरिति न्यायात्तत्राह अजयासमदंति त्वत्कृपारूपमायया मनुष्यैर्दत्तं हव्यकव्यादि भक्षयंति। तत्र दृष्टांतः। वर्षभुजो विलक्षितिपतेरिति।
यथा खंडमंडलपतयो महामंडलेश्वरस्य कृपयैव स्वप्रजादत्तबलिं समदंति भुंजते कथं तदाह विदधति यत्र ये त्वधिकृता इति तु यस्मात्त्वत्त्रये
प्रभवः कृतान्नितत्तदधिकारं कुर्वंति अतो भयतः परमेश्वराच्चकिता भीता यथाच्युताधिकारा न भविष्याम इति तथाह श्रुतिः भीषास्माद्वातः
पव॰ पंचम इत्याद्याः अनेन स्वसंकल्पमात्रनिबंधनो जीवेशविभागोऽनेन तत्त्वसंकल्पेन लीयतेऽपीति भगवतो योगिन्द्रस्य संकल्पसृष्टोपा
धिकजीवेशाद्भिभेदर्शनं तत्त्वपूर्णत्वसृष्टृत्वसर्वप्रभुत्वादिमाहात्म्यमखंडितमिति दर्शितं अतस्तत्रैव प्रेमा समुचितो नान्यत्र यतो ब्रह्मणा
विष्टचित्तानां सर्वदानंददर्शनं पुत्राद्यासक्तचित्तानां तापश्रेणीति इत्थं तदुत्पाद्या विस्तरः ७५ ननु सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं
नेह नानास्ति किंचन अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्तीत्यादिश्रुतेः सद्वा निरुपाधिसच्चिदानंदैकरूपस्य तव किमि
तिसृष्टौ सिसृक्षैव कभावे वाग्रह इत्याशंक्य न भोगार्थं सृष्ट्यादिः किंतु क्रीडार्थमित्याह। स्थिरेति भो तत्तो विमुक्त अविद्यातो नित्यविबु
द्ध यद्यपि तव विहरणे विहारः क्रीडा इच्छा वा भवति भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापर इति श्रुतेः तर्हि तपउदीक्षया ईक्षणेन
संकल्पेन स्थिरचरजातयः स्युः स्थावरजंगमात्मकानि शरीराणि तदुपाधयो जीवाश्च घटाकाशवदुपाधिसमकालमेव प्रादुःस्युः।

स एष तल्लोकाननुसृजति इति स इमान् लोकानसृजत यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेतस्मादात्मनः सर्वे प्राणाः सर्वे लो
काः सर्वे देवाः सर्वाणि च भूतानि च सर्व एव त आत्मनो व्युच्चरंतीति श्रुतिभ्यः। ननु तर्हि वैषम्यनैर्घृण्ये स्यातां तत्राह अजयो
त्थानिमित्तयुजः अजया स्वाभाविकज्ञानादिशक्त्या स्वस्वरूपभूतया स्वं उत्थितं यन्निमित्तं कार्यानुकूलं धर्मं कि वैचित्र्यं तेन
युज्यंते साध्यंते येति तथा कारणतावच्छेदकीभूतशक्तिभेदेनैव फलभेदान्न कोपि दोष इति भावः। ननु क्रीडासुखविशे
षार्थं दृष्टा परमेश्वरस्य सा कि मिति तत्राह परस्येति परमेश्वरस्येत्यर्थः देवस्यैष स्वभावोयमाप्तकामस्य का स्पृहेति
श्रुते जगत्सर्जनं क्रीडानसुखार्थं किंतु स्ववैभवप्राकट्यायैवेति भावः ननु तर्हि कोप्यन्यास्ति यं प्रति प्रकटीक्रियते त
त्राह अजयोत्थानिमित्तयुजः नहीति परस्य सकलविकल्परहितस्य परः स्वीयो वा परो भिन्नश्च स्वसमाद्भिन्नो न भवेत्स
वे८ भवतीत्यर्थः अत्र दृष्टांतः वियत इति तथा निरवयवत्वाद्वियत आकाशस्य न परो वा स्वो न वाप्यपरो आंतर इत्यर्थः अ
त एवापदस्य पद्यते गम्यते नेनेति पदं गमकं नास्य स्येत्यपदस्तस्य यतो वाचो सहेति वाङ्मनोतीतस्येत्यर्थः तथा चानिर्वा
च्यमेवेदं सर्वं नन्वायविषय इति भावः तथाह श्रीभागवते भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः अमुष्य दुर्भगत्वं वा
क्लेशो वा कर्मभिः कुतः इति विदुरप्रश्ने सेयं भगवतो माया यन्नयेन विरुध्यते ईश्वरस्य विमुक्तस्य कार्पण्यमुत बंधन
मिति मैत्रेयः अत एव स्वमन्यनुलोदधतः स्वमन्यवदनुपारव्यत्वं दधतो न तु स्वमन्यतां तत्साक्षित्वात् प्रभोः स्वातंत्र्यमेवता
दृशव्यापारे हेतुर्वोध्यो नान्य इति भावः १६ एवमेकस्यैव स्वातंत्र्याज्जीवजगद्भावो न पृथगित्युक्तं इदानीं ये जीवानां वस्तुतो
भेदं साधयंति तान्निरस्यति अपरिमिता ध्रुवतनुभृतो यदि अपरिमिता असंख्याताः ध्रुवाः अबाध्याः सर्वे सर्वगताः

आपकाः स्युस्तर्हि तेषां न शास्यता स्यात् विभूनां कालाकाशादीनां परस्परानधीनत्वदर्शनादिति भावः न च कर्मपरतंत्र
त्वाज्जीवानां शास्यतेति वाच्यं चेतनस्याचेतनाधीनत्वानुपपत्तेः दृष्टान्ताभावात् ननु मास्तु शास्यता तत्राह इतरथा जीवानां शा
स्यत्वाभावेन प्रवृत्तेर्या दृष्टिकर्तृत्वाभ्युपगमे इति इतिशब्देन श्रुतिप्रत्यक्षदृश्यमानं नियमं भविनीय दर्शयति दृश्यन्ते हि वज्रवह्नि
वीध्यमाना दुर्विजाः श्रूयन्ते च श्रुतौ यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरं यो विज्ञानमन्तरो यमयति
य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयतीति परमेशेन शास्यमानाः सोऽयं नि
यमः शास्यत्वाभावेन स्यादित्यर्थः ननु देहेन्द्रियाद्यवच्छेदेन जीवानां शास्यत्वं न विभुत्वेन रूपेणेति चेत्तर्हि कार्योपाधिरयं जीवः का
रणोपाधिरीश्वर इति श्रुतेरौपाधिके जीवेश्वरयोर्जीवानां च परस्परं भेदे सिद्धे किं मे तर्गणनातेषां विभुत्वेन वक्तृत्वेन वा न्ता किं किम
ते श्रोत्रे केऽपि कर्णशष्कुलीरूपोपाधिभेदेन शब्दव्यवस्थावदात्मैक्येऽप्युपाधिभेदाद्वशगतस्यास्य विभागस्य बंधमोक्षव्यवस्थाया
श्च सिद्धेरित्याशयवानाह अजनीत्यादि यन्मयं उपाधितो यद्विकारस्यायं जीवाख्यमजनि जातं तत्तस्य नियन्तृ नियामकं भवेत्
अविमुच्य कारणतयाऽपरित्यज्य अयं भावः केषांचिन्मते मायाप्रतिबिंबितं चैतन्यमीश्वरः मा[illegible]कार्यान्तःकरणप्रतिबिंबि
तं चैतन्यं जीवः बिंबस्थानीयं शुद्धचैतन्यं तुरीयं अन्येषां तु प्रतिबिंबो जीवः बिंबभूत ईश्वर इति च द्वैविध्यं केषांचिच्च विद्यावच्छि
न्नानवच्छिन्नावेव जीवेशौ तत्र प्रथममते जीवेशौ द्वावप्युपस्तौ शेषयोस्तु जीव एव तथा च कार्यकारणोपाधिकयोरध्यस्ताधि
ष्ठानत्वरूपयोर्वा जीवेशयोर्भेदोऽपि योगाभावेन नियम्यनियामकत्वं संभवतीति नैयायिकादिनये तु तटस्थस्येश्वरस्यान्तर्या
मित्वं संभवतीत्यलं विस्तरेण। यन्मयं कार्यं तत् किंविधमित्याकांक्षायामाह सदित्यादि सदनेककारणं ब्रह्मानुजानतो शास्त्राचार्योपदे
शादनु साक्षात्कुर्वतो यन्मतम ज्ञातं प्रत्यक्षेणाविषयत्वात्। अदृष्टं द्रष्टृ अमतं मन्तृ अविज्ञातं विज्ञातृ इति श्रुतेः। अमतत्वे हेतुः मतदुष्टतयेति।

मृतस्य ज्ञातस्य घटादिवद् अनात्मत्वेन अतोऽन्यदार्त्तमिति श्रुते मिथ्यात्वापत्ति दोषग्रस्तत्वात् अयं ज्ञातं तन्न ब्रह्मेत्यर्थः तथा च श्रुतिः यस्याम
तं मतं तस्य मतं यस्य न वेद सः अविज्ञातं विजानतां विज्ञातमविजानतां । यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपमिति २
अजानि चयन्मयमितलनेन जीवानां कार्योपाधिकं जन्म कथितं तु तदपि न घटते कार्योपाधीनां जीवानामुपाधिजन्मना जन्मवतां कृत
नाशाकृताभ्यागमदोषप्रसंगादित्याशंक्य न हि वयमसत्कार्यवादिनः किंतु सत्कार्यवादिनोऽतः कार्यस्यापि कारणे सत एव तिलतैल
वदाविर्भावमात्रं जन्मेति मत्वा किं प्रकृत्युत्पत्त्या पुरुषोत्पत्त्या वा जीवानां जन्माशंक्यत इति विकल्पं दूषयंति नेति प्रकृतिपुरुषयोरु
भयोरप्युत्पत्तिर्न घटते अत्र हेतुगर्भं विशेषणं अजयोरिति अजामेकां अजो ह्येक इति श्रुत्या प्रकृतिं पुरुषं चैवेति स्मृत्या च तयोरजत्वावग
मादित्यर्थः कथं तर्हि एते आत्मनो व्युच्चरंतीत्यग्निविस्फुलिंगन्यायेन ब्रह्मणः सकाशाज्जीवोत्पत्तिराम्नायते तत्राह उभययुजेत्यादि य
थाजजत्तुबुद्बुदे जलेनोत्पद्यते नापि तदवच्छिन्नाकाशः अथापि केन चिन्निमित्तेन जलक्षोभे सत्युभयात्मकं बुद्बुदमाविर्भवति एवं जीवेऽपि ना
तःकरणमुत्पद्यते नापि तदवच्छिन्नं चैतन्यं अथाप्यनादिकालप्रवृत्तजीवादृष्टादिना मायाक्षोभे सति उभयात्मा जीव आविर्भवतीति
मुच्यत एव व्युच्चरणश्रुतिः कृतहानाद्यभावश्चेति भावः यत एवं ततो हेतोस्त इमे जीवा जलबुद्बुदा इव तत्त्वयि परमेश्वरे विविधैर्नामगुणैरुप
क्षिताः संतोऽपि विसारितइयं मधुनि अशेषरसा इव च पूर्वकल्पांते लिप्सुलीनाः अग्निकल्पेपि तत एवोत्पन्नास्त्वय्येव वसंतीति भावः।
तथा च श्रुतिः यथा नद्यः स्यंदमानाः समुद्रे अस्तं गच्छंति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यं यथा सो
म्य मधु मधुकृतो निस्तिष्ठंति नानात्ययानां वृक्षाणां रसान्समवहारमेकतां रसं गमयंति ते यथा तत्र विवेकं न लभंते अमुष्याहं वृक्षस्य र
सोऽस्मीति एवमेव खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति यत्वात्वधिमधुनीति संबंधः श्रुतौ ब्रह्मण्यपि मधु
शब्दप्रयोगात् अस्मिन्पक्षे रसा विषयानंदाः एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः सर्वेऽपि विषयानंदा ब्रह्मांभोधेरेव
विप्रुष इति १८ एकस्मिन्कल्पे त्वत्त एवोत्पन्ना जीवास्त्वय्येव संतीति कथितं अधुना जीवस्य बंधमोक्षावपि त्वदधीनावेवेत्याह न्यक्षिति नृषुपु
रुषेषु तव परमेश्वरस्य मायया कार्यं प्रति कारणतावच्छेदकरूपेच्छाशक्त्या भ्रममुक्तलक्षणं अवगत्य संसारवृद्धिकर्तो च तिरस्कर्तासि ए

वस्त्र तदिच्छयाततोऽलस्यवंधमोक्षौप्रकीर्त्तितौ विलिशास्त्रतोऽज्ञात्वा सुधियोमाहात्म्यविदः भगशमत्वं तं त्वयिकरुणासागरे ऽतएव अभवे भ
वराहिते भावंप्रेमाणं दधतिकुर्वंति किमिति तत्राह कथमिति अनुवर्त्तीतां त्वामनुवर्त्तमानानामन्वह मनु किं कुर्वतां भवस्य संसारस्याभ
यं अनुप्रभवं प्रभवउपायभिव्यक्तिस्तमनु आश्रित्य इत्यनुप्रभवं अनादिसृष्टिपरंपरागते कथैभवेन कथमपीत्यर्थः ननु धर्मादि
नापि भवभयमस्ताति श्रूयते तस्मात्प्रभावरूपो चितत्वात् तेषामप्येवभावो विधेयइत्युच्यते तत्राह कुतः यस्मात्तत्र भ्रुकुटिर्भंगः
कोपाख्यः अभवं चरणेषु नभयान्शरण्ये येषां तेषां नभयं जरामरणादिदुःखं भवत्यमुः सजति भ्रुकुटिं विशिनष्टि त्रिणेभिरिति त्रयोगु
णाः सत्वाद्याः नेमिश्चक्रधारा तद्युग्वरकायस्पतथा भक्तेसत्वमाश्रित्यैव तमसादेत्यादिहननं श्रवणात्त्वदि स्युस्तत्वकोपादुरुभयेसंसा
रचक्रे भ्रमंति मुच्यंतेपि कथं चित्त्वत्प्रसादादेवेति भावः १९ सुधियस्त्वयि भावं दधतिते नचमुच्यंते संसारादित्युक्तं तत्र सुमुक्षानवत्त्वे गुरुरू
पां विना प्रयत्नकोटिभिरपि न भवतीत्यभिप्रेत्य सगुरुमेवाभिगच्छेत्स मित्पाणिः। यस्यदेवे परा भक्तिर्यथा देवे तथा गुरौ इत्यादिश्रुतिभिरु
क्तं गुरुभजनमाह विजितेति भो अजयेन राः गुरोश्चरणंसमवहाय्य परित्यज्य विजिता नियानिहृषीकाणी इन्द्रियाणि चायुश्च प्राणो
यैस्तैरतैरप्यदांतमदभितैतत्त्वप्रतिपत्त्ययोग्यं मनस्तुरगं चित्तहयं अतिलोलं स्वभावतश्चंचलं तत्त्वप्रतिपत्तयै नियंतुं निग्रहीतुं य
तंति यत्नं कुर्वंति। तेइह संसारे जलधौ अकृतकर्णधरा अस्वीकृतनाविकावणिज इव अवसन्ना दुःखिताः संतिनवहिर्गं तुंशक्नुवंती
त्यर्थः अतएवतेउपायखिदः आसनबंधादिरूपायैः खिद्यंतेत्यर्थश्चमाहत्यर्थः व्यसनशतान्वितास्तेभवंति व्यसनानिमारणमंत्रौषधि
प्रभृतीनितेषां शतेरन्विताः गुरुयुक्तिं विनानानोपायैरपिमनोजयो न भवति विनाचमनोजयंत्वयि भावासंभवः वालस्पर्शद्वनास
कृस्यैवानन्यभक्तिसंभवात्। विनाचभावंभवभयं न निवर्त्तते गुरुस्तुतं स्वभक्तं कृपया परांचि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्य
तिनांतरात्मन् कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् पद्मकोशप्रतीकाशं लंबत्याकोशसंनिभं संततं शिकराभिश्च
हृदयेचाप्यधोमुखं तस्यमध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः तस्यमध्ये वह्निशिखा अणीयो र्ध्वा व्यवस्थिता तस्याः शिखायामध्ये पर
मात्माव्यवस्थितः सब्रह्मासशिवः सहरिः सोक्षरः परमः स्वराट्। अणुः पंथा विततो पुराणो मांस्पृष्टोनुवित्तो मयैव तेन धीरा अपियंति ब्रह्मविदः स्वर्गं लोकमि

ऊर्ध्वो विमुक्ताः तस्मिन् शुक्लमुत नीलमाहुः पिंगलं हरितं लोहितं च एष पंथा ब्रह्मणा हानुवित्तस्तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्चे
ति सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणामित्यादिस्मृतिस्मृतिसूचितमनुभवप्रका
रं करतलामलकवद्ग्राहयति तेन च स योगी भवबंधाद्विमुच्यत एव शिष्य इत्यत्र न संदेहस्तस्मान्मुमुक्षुः श्रेयसे तादृशं गुरुमवश्यं प्रपद्ये
त तदुक्तं तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय आत्मनः शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयमिति तस्माज्जितासुना गुरुभक्तिपूर्वकं
मेव श्रवणादिकं कर्तव्यमिति २८ तत्तु अभ्यासेन तु कौंतेय वैराग्येण च गृह्यत इति स्मृतेः गुरुर्मनोजयाय अभ्यासवैराग्ये उपदि
शति तेन वैराग्येण विषयस्रोतः खिलीक्रियते अभ्यासेन तु कल्याणस्रोत उद्घाट्यते तत्र द्वयं क्रमेण द्वाभ्यामाह स्वजनेति नृ
णां त्वयि सति स्वजनादिभिः किमित्यन्वयः आत्मा देहः धाम गृहं असुः प्राणः रथो गजादेरुपलक्षणं कीदृशे त्वयि अयत
आत्मनि त्वां ध्यायतः प्रत्यग्भूते अत एव सर्वरसे यद्वैतत्सुकृतं रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति श्रुतेः अत एव सर्वसुखस्वरूपे त्व
यि लब्धे स्वजनादिभिः किमपि प्रयोजनं नास्तीति एवंप्रकारेण सत्तमं परमात्मानं परं ब्रह्मेति अजानन्तो मिथुनतो विशेषसंबंधेन रत
ये मायासुखाय चरतो इतस्ततो धावतो कर्मणि यष्टी एतान्पुरुषानिह संसारे को नु स्वजनादिष्वन्यतमः सुखयत्यानंदयति न कोऽपीत्यर्थः
कथंभूते संसारे स्वविहते स्वत एव नश्वरे सर्वं चेदं क्षयिष्णु यथेमे दंशमशकादय इत्युपक्रम्य शुष्को भवन् महार्णवानां निरवरोधप्रपतनं ध्रुव
स्य प्रचलनं वृक्षनिपातनं स्थानाद्देवानां निमज्जनं पृथिव्याः स्थानादपसरणं सुराणामिति मैत्रायणीये सर्वस्य क्षयिष्णुत्वोपपादनात् अत एव ए
स्वनिरस्तभगे स्वत एव गतसारे एतदपि तत्रैव श्रूयते इंद्रजालमिव मायामयं स्वप्न इव मिथ्यादर्शनं कदलीगर्भ इवासारं नट इव क्षण
वेषं चित्रभित्तिरिव मिथ्यामनोरममिति एवं बाह्यविषयसंभोगेन सुखप्रेप्सून् पुरुषान् पसदानिह संसारे स्वविहते स्वनिरस्तभगे स्वजना
दिष्वन्यतमः को नु सुखयति न कोऽपीति निर्गलितार्थः तस्मात्सर्वमन्यत्परित्यज्य त्वमेवाश्रयणीय इति भावः २९ एवं वैराग्यमु
क्त्वा मान्ये नविद्ध्वक्षणानि तान्येव ज्ञानसाधनानीति मत्वा विद्वत्संचारप्रदर्शनेनाभ्यासं विधत्ते भुवीति ये कथितवैराग्यवंतो ऋ
षयः कर्तव्या भुवं त्वा आत्मानमिति पारोक्ष्येण ज्ञातात्मतत्त्वाः सारासारविचारचतुराः भुवि कर्मभूमौ पुरुपुण्यतीर्थसदनाः पुरू
णि बहूनि तीर्थानि सदनानि येषां ते तादृशाः भुवि तीर्थसेवनेन कृतपुण्यपुंजाः विमदा निरहंकारा अत एव भवत्पदांबुजं हृदि येषां अ

13

तत्रप्रथ्य अथाभिलापनाशकं अंध्रिजलेयेगाजलंयेषांते स्वयंतीर्थरूपास्तेनित्यसुखेआत्मनित्यंयित्सकृद्गुरुकृपाकटाक्ष
मात्रेणमनोदधतिधारयंति उक्तअपिपुनः पुरुषसारहृद्य वसथान् पुरुषाणांसारंविवेकधैर्यक्षमाशांतिप्रमुखंहरंती
तितादृशानावसथान् गृहान्योपासन्ते तदासक्तानभवंति दोषदृष्ट्यासाधकदशायामेव विरक्तस्यभगवत्स्वरूप
प्रबोधदशायामेवविषयेषुवैराग्यंभवतीतिभावः अत्रभूमिकाक्रमेणभगवत्प्रबोधकथनात्तत्रस्थितोयत्नोभ्यो
सइतिपतंजलिसूत्रलक्षितोभ्यासोलब्धः तत्रपरमात्मनिस्थितिनिमित्तंयोयत्नोमहत्संगतीर्थसेवनाध्यात्मविद्या
ध्ययनादिःसोभ्यासइतितदर्थः २२ गुरुमुपासीनःश्रुतोपनिषत्कःशास्त्रात्प्रपंचस्यब्रह्मविवर्तत्वमज्ञानपरिणाम
त्वमज्ञानस्यचतुच्छत्वमित्यवगच्छति अत्रापि यतउदयास्तमयौविकृतेर्मीद्यात्तविकृतात् भिन्नयद्ववोधकृता असद
नुजादितियत्रितयमुक्तं तत्रशंकते सतइति इदंविश्वंसत् यतःसतउत्थितं सदुत्पन्नत्वादित्यर्थः दृष्टंहि यद्यदुत्पन्नं त
त्तदात्मकं यथाकनकादुत्पन्नंकुंडलंकनकात्मकं उत्पन्नत्वंयद्यपिविवर्त्तत्वेतथापिगोरश्वत्वादितिवद्विरुद्धमित्याह नचेति।
निर्युक्तिकमेतत्सत्त्वसाधनमित्यर्थः विवर्त्तलक्षणपर्यालोचनत्वेनासत्त्वमेव प्रपंचस्यापीतिभावः ननुपरिणामत्वमुत्पन्न
त्वंतथाचनदोषस्तत्राह अभिचरतिकचेति क्षीरपरिणामस्यदध्नःक्षीरत्वाभावादितिभावः ननुतत्परिणामत्वेनतत्सम
सत्ताकत्वंलक्षयामेकं साध्यतेनतुकश्चनदोषइतिचेत्तत्राह कंचमपेति स्वप्नागनादेर्याव इत्यर्थः स्वप्नांगनादेर्मनोभिन्नसत्ता
कत्वादितिभावः ननुस्वप्नांगनादेःसमसत्ताकत्वमेवेष्टं अन्यथातस्यचरमधातुविसर्जनार्थक्रियाकारित्वादिनस्यात् कल्पतांतर्हि
नाप्यद्वैधवाऽप्यु३ त्वंसत्यस्याबाधादितिचेत्सदसदात्मकत्वस्वीकारेणतदुभयसंभवादिति तस्मात्सदसद्वानिर्विमनेतिचेत्तत्राह ननयेसादि
सत्त्वासत्त्वात्मकंपरस्परविरुद्धधर्मद्वययोगिनभवतीत्यर्थः बाध्यत्वात्सार्थक्रियाकारित्वाभ्यांअत्यंतसत्त्वेऽत्यंतासत्त्वेचप्रतिषि
द्धेऽनेकात्मतेतिचेन्न सत्त्वासत्त्वपर्यालोचनतस्तदुभयात्मत्वबाधादनिर्वाच्यत्वस्यैवाभ्युपगमात् नचार्थक्रियाकारित्वानु

पपत्तिः। मघात्वे पि स्वप्नेग मासंगमस्येव तत्संभवात् ननु सर्वस्य मिथ्यात्वे सत्यमिदं मिथ्येति व्यवहारः कथमित्यत आह व्यवह
तये विकल्प इषित इति इति सत्यमिदं मिथ्येति स्वप्नव्यवहारे जाग्रती तजाग्रत्यपि तादृशव्यवहारे हेतुः पूर्वपूर्वविकल्पोऽभ्रम इषि
तोऽभ्युपगतः ननु कथमभ्युपगतः अत्यंतास्मत्त्वे भ्रमस्यैवासंभवात् अन्यत्र सत एवान्यत्रारोपादित्यत आह अंधेति भ्रमपरंप
रयेत्यर्थः आरोपे पूर्वप्रतीतिमात्रमुपयुज्यते न तु प्रतीतस्य स्वरूपसत्वमपि तेन विनापि संस्कारमात्रादुत्तरभ्रमसंभवात्।
तस्मात्सागभवीयानन्तभ्रमसंस्कारधाराभिरेव सर्वव्यवहारसंभवेन तु दृन्यथानुपपत्त्या वियदादिप्रपंचस्य सत्यत्वकल्पनं वादि
नाम्रमूनिर्बंधनमेवेतिभावः ननु तद्देवशास्त्रं सर्वे पि कुतो न जानंतीत्याशंक्याह भ्रमयतीति नेतव निश्वासरूपा वेदवाणी
अक्षय्यं ह वै· वति। अपाम सोमम्· भूम। प्रजामनुप्रजायते तदु ते मर्त्यामृतं नापुत्रस्य लोकोऽस्तीत्यादिका उभ्यजडो नो निष्ठति
स्वर्गादिफलं येयस्मात्तदुक्तं कर्मप्रतीकोपास्तिश्च तत्र विषये अज्ञजडान्गुरुवृत्तिभिर्वहीर्भिर्गौणिलक्षणादिशब्दवृत्तिभिर्भ्रमयति
मोहयतीति यस्मादतस्ते शास्त्रतत्त्वं न जानंतीतिभावः एतदुक्तं भवति ये कर्मजडास्ते अक्षय्यं ह वै अमृता अभूमेत्यादावक्षयादिश
ब्दानां यत्कृतकं तदनित्यमिति न्यायानुगृहीतया तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति श्रु
त्यावगम्यमानं कर्मफलस्यानित्यत्वं स्वयमप्रतिपद्यमानाः आभूतसंप्लवस्थानममृतत्वं हि भाष्यत इति स्मृत्या व्याख्यातमपि
चिरकालमात्रपरत्वेन पश्यंति तान्कर्मफलस्यानित्यत्वममन्यमानान्भारती भ्रमयति एवं ये उपासनाजडाः अथ योऽन्यां देवतामुपा
स्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानां तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते [illegible] ह्येवैष एतस्मिन्नुदरमंतरं कु
रुतेऽथ तस्य भयं भवति सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेत्यादिभेददर्शननिंदायां सत्यामपि द्वा सुपर्णा सयुजा सखाया समानं वृ
क्षं परिषस्वजाते इत्यादिश्रुतेरौपाधिकभेदपरत्वं सत्स्वपि नान्योऽतोऽस्ति द्रष्टा तत्त्वमसि अहं ब्रह्मास्मीत्यादिजीवब्रह्माभेदपरवाक्येष्व
प्रतिपद्यमाना भेदसत्यत्वं मन्वते तानपि भ्रमयति तथा च श्रुतिः न तं विदाथ य इमा जजान अन्यद्युष्माकमंतरं बभूव नीहारेण

शा॰ रं॰ रंतीति यामिमां पु॰ वाग्निरिति कर्मप्रजास्तुतिपरो वेदः कर्मणामक्षय्यफलत्वे प्रजायाश्च्याम्नतत्वे ब्रवीति न तात्पर्येणेति
भावः तस्मादिह मत्र पर्यवसितं ये ब्रह्मविदस्त एवमुच्यंत इति तदुक्तं वेदांतविज्ञानसुनिश्चितार्थाः सन्यासयोगाद्यतयः शुद्धस
त्वाः ते ब्रह्मलोकेषु परांतकाले परामृतात्परिमुच्यंति सर्वे इति ब्रह्मसत्यं जगन्मिथ्येति जानतामावरणविक्षेपयोरभावेन क्ष
तक्ले सत्तात्सर्वेषां च वेदांतानां तत्रैव तात्पर्यमित्यास्तां विस्तरः २३ जगतः सत्यत्वे युक्त्यभावमुक्त्वा मिथ्यात्वे युक्तिमाह नेति
तथा चायं प्रयोगः इदं प्रत्यक्षादिसिद्धं जगन्मध्ये अंतराभृतत्वात्स्वप्नवदितिहेतुं साधयति नयदिति यत्तु यतः अष्टस्वभाव ×
इदं दृश्यं अग्रे सृष्टेः पूर्वं नास्ति तथा निधनात्तु नाशादूर्ध्वं न भविष्यति विनाशं गच्छति अतोंतरा मित्तं मृषैव स्वप्नवदृष्टत्वे
14 त्वादित्यर्थः कथं तर्हि घटः सन्निति प्रतीतिरित्यत आह तथ्यैकरसे विभातीति सर्वाधिष्ठानसच्चिदानंदसंबंधात्तथावभासत
इत्यर्थः यत एवमतः श्रुत्या द्रविणजातिविकल्पपथैरुपमीयते द्रविणं सुवर्णलोहादि तदृष्टांतमार्गेण तथा जातिः तापयत्यर्थ
मिति तेन लिंगं तेन युक्तिमार्गेण तथा विकल्पः शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः तन्मार्गेण सर्वमिदं जगद् ब्रह्मैवेत्युपमीयते
तत्र छांदोग्ये तावत् येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्येकविज्ञानेन सर्वविज्ञानमुपक्षिप्य कथं नु भ
गवः स आदेशो भवतीति यथा सोम्यैकेन मृत्पिंडेन ज्ञातेन सर्वं मृण्मयं विज्ञातं स्यात् यथा सोम्यैकेन लोहमणिना सर्वं लोह
मयं विज्ञातं स्यादित्याक्षेपपूर्वकं दृष्टांतमुखेन समर्थितं सोयं द्रविणपथोऽद्वैतप्रतिपत्त्युपायः तथा अजायमानो बहु
धा विजायत इति श्रुतिर्विवर्त्तवादीनां ब्रह्मप्रपंचयो रज्जुभुजंगवदुपादानोपादेयभावमवगमयति सोयं जातिपथोऽद्वैतप्र
तिपत्त्युपायः तथा छांदोग्ये मृदादिदृष्टांतांते वाचारंभणं नामधेयं मृत्तिकेत्येव सत्यमिति विकाराणां वागालंबनत्वापरपर्यायो वि
कल्पमात्रं श्रुत शशशृंगवंध्यासुतादेरिव कार्यकारणभावस्यालीकत्वाभिप्रायकं सोयं विकल्पपथस्त एव पथाः शतशः
श्रुतिषु निगदिताः यत एकरसे ब्रह्मणि शुक्तिशशस्थानीये तथा घटरजतशृंगस्थानीयमिदं परिणामविवर्त्तविकल्पैर्विदि

घं यथा स्यात्तथा विभाति अतोऽद्विगुणजातिविकल्पपथैर्मंदमध्यमोत्तमाधिकारिणां क्रमेणाद्वैतप्रतिपत्तये द्वयमि
दमुपमीयत इति निष्कर्षः फलितमाह वितथमनोविलासमिति असतोऽधि मनो जायत मनः प्रजापतिमसृजत प्रजापतिः
प्रजा असृजत तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं किंचेति श्रुतेर्मिथ्याभूताज्ञानोपादानकमनोमात्रं जगदित्यर्थः
एवंविधबोधशून्याननुक्रोशति ऋतमित्यादि असदप्येतन्मूढाः सत्यमिति जानंति यथेंद्रजालिकनिर्मितनगरे व्यवहर
तो वणिजो निरालंबनव्यवहारतया पुरतत्वविद्व्यवहरन्नुपहसति तथैव लाभद्वाराऽनभिज्ञो यो निर्व्यापार इत्युपहसंति
एवं बुधाबुद्धौ परस्परमुपहसतः यथोक्तं वार्त्तिके बुद्धतत्वस्य लोकोऽयं जडोन्मत्तपिशाचवत् बुद्धतत्वोऽपि लोकानां जडोन्म
त्तवदिति गीतायामपि या निशा सर्व• श्यतो मुनेरिति (ऽद्विगुणजातिविकल्पपथैरद्वैतं प्रति पृथक्कृतं कल्पो भवतीति तात्पर्या
र्थः २४ वस्तुतः सर्वापवादेऽपि बद्धमुक्तविभागस्त्वत्संकल्पकृत एवेत्याशयवानाह सयदिति यदा त्वं अजया स्वसंकल्प
रूपया मायया सात्विक्याऽजामघटनघटनापटीयसीं तामसीं कर्तृत्वादिशक्तिकामनुशयीत आलिंगते तदनु पश्चात्स
जीवो भवति च पुनः गुणाश्रांतघोररूपादीन् जुषन्सेवमानः सरूपतामनात्मैक्यं मृत्युं भजति यतोऽपेतभगः अविद्ययाति
रस्कृतैश्वर्यः तव संकल्पाद्बद्धजीवजगद्विभागः त्वं तु पुनः शुद्ध एव योगीव स्वसंकल्पकृतस्वबद्धभवनानेकानर्थकौतुक
च पश्यन्नपि सदा मुक्त एवासीत्याह त्वमुतेति त्वमुत त्वमेव तां मायां जहासि यत आत्तभगः नित्यप्राप्तैश्वर्यः अपुनस्तान दूरीकरोषि ५
क्त्वा तद्दूरीकरणे तवैव सामर्थ्यमस्तीति भावः ननु सा सर्वाधिष्ठाने मय्येवास्ति न तत्कथं तत्त्यागस्तत्राह अहिरिव त्वचमिति
यथा सर्प आत्मतयोपात्तां त्वचमनायासेनागुणबुद्ध्या त्यजति तथा त्वमजामित्यर्थः किमिति जहासीत्यत्राह महसि मही
यसेऽष्टगुणित इति यतो महसि परमैश्वर्यैकरूपे भवते अष्टगुणितेऽणिमाद्यष्टविभूतिमति परेऽपि तो महीयसे पूज्यसे जनैरि
ति शेषः स्वोपकारायेश्वरत्वाज्जनैस्त्वं पूज्यसे तवापि तत्संबंधेनातुऽष्टसर्गात्स्वतामिवापवादप्रसक्त्या पूज्यत्वमापद्येतेति न

वत्स्यागआवश्यकइतिभावः तर्हि किमिदमष्टविधैश्वर्यमानेय तथा सत्यब्रह्मत्वमापद्येत तत्राह अपरिमेयभगइति
अपरिमितैश्वर्यइत्यर्थः नहि त्वमष्टगुणमेवैश्वर्यं किंतु सर्वाधिष्ठानत्वसर्वबाधावधित्वादिकमपरिमितमतोजीवेशादि
विभागोपि त्वयि कल्पनामात्रं तदेतत्त्रयं स्वप्नमायामात्रमुविकल्पो ह्ययमात्मेत्यादिश्रुतेरितिभावः २५ पूर्वश्लोके सर्वा
धिष्ठानसर्वबाधावधिज्ञानादेव मोक्षो भवतीति ज्ञापनाय परमेश्वरस्यापरिमेयभगत्वमुक्तमिदानीं येबहिःसंगं परित्यज्य
तादृशज्ञानमार्गे प्रपन्ना अपि कथंचिद्दैवगत्या विनष्टास्तेषां दशामाह इति यदीड्य भो भगवन्यतयः संन्यासिनः यदिहृदिस्थिताः का
मजटाः काममूलवासनाः न समुद्धरंति समूलं नोन्मूलयंति तर्हि तेषामसतां भवान्हृदिगतोपि श्रवणमनननेन निश्चि
तोपि दुरधिगमः दुःप्रापः कथं असन्तः कंठमणिः विस्मृतकंठमणिरिव स यथा कंठे वर्त्तमानोपि स्मृतिभ्रंशे दशामइयभवतितत
द्वदिति नकेवलमेतावत् किंतु असुतृप्ययोगिनामिंद्रियतर्पिकामानां कुयोगिनामुभयतोप्यमुत्रैवेह दुःखमुक्तं चदुःखमेव तत्रेहलोकोपहासादि
ना यथा नत्वं बुभुक्षापिकामादीनि शमेन जहासीति चेत् यथेष्टाचरणं तेषां कर्मशास्त्रातिलंघिनः बुधादेर्न स तत्त्वस्य यथेष्टाचरणे सैषादि
श्रुतीनां तत्त्वदृशां चैय कोभेदः शुनिभक्षणे वा धारयुगमनीमात्रेणाक्लिष्टतथाधुना अशेषलोकनिंद्यं चेत्यहो तेबोधवैभवं विद्वुराहादितु
त्पत्त्वमाकांक्षीत्तत्त्वविद्वान् सर्वधीदोषसंत्यागाज्जनैः पूज्यश्चदेववदिति परत्रतुनरकपाताद्दुःखं कथितं परमहंसोपनिषदि तितिक्षाज्ञा
नवैराग्यशमादिगुणवर्जितः भिक्षामात्रेण योजीवेत्सपापीयतिवृत्तिहा काष्ठदंडोधृतो येन सर्वाशीज्ञानवर्जितः सयातिनरकान्घोरान्महा
रौरवसंज्ञकानिति कुतोऽसुखं तदाह आत्मनपगतांतकात् अनिवृत्तमृत्योः नसांपरायः प्रतिभातिबालं प्रमाद्यंतं वित्तमोहेन मूढं।
अयंलोको नास्तिपर इतिमानी पुनःपुनर्वशमापद्यते मे इतिश्रुतेर्मृत्युवशगत्वात् तथा अनधिरूढपदात् अनधिरूढमज्ञातं पदं
स्वरूपं यस्य तादृशाद्भवतः परमेश्वरादपिकुतोदुःखमित्यर्थः विकर्मसंस्थोपियदि कदापि भगवत्परायणो भवति तदानर्थं सोर्वे
शंगच्छति अपिचेत्सुदुराचारोभजतेमामनन्यभाक् साधुरेव स मंतव्य इत्यादि युक्तेरितिभावः २६ पूर्वश्लोके विकर्मस्थोपि तद्भक्तितः संसारान्मुच्यत इति सूचितं तदत्र पूर्वो
त्तरार्धाभ्यां निर्गुणसगुणोभयभक्तिं लक्षयति त्वदिति भगवंस्त्वद्यगमश्रवणाद्यभ्यासबलेन स्वरूपज्ञानवान् भवतीविदितात्स

१५

कारणं तु त्यिअथिते हरीभूते शुभाशुभे तयोः सुखदुःखयोः कर्मणिवर्ष्मी तेन जानाति अपि च तर्हि तदानीं देहभृतो प्राणिनो गुणवि
गुणान्वयादुत्तमत्वाधमत्वसंबंधान्नवेत्ति इत्यनुषज्यते तथा गिरः शब्दादीन्विषयांश्च नवेत्ति किंतु अत्रानात्मा तद्दर्शनेनैव तत्फलमिति वे
धा इतरादर्शनेनैव तद्दर्शनस्य तत्फलत्वपर्यवसायित्वात् यथा राल्पैचाध्याय्यो अपररानिमि॰ तं यथा। तेका॰ संभ्रुतः॥ सर्वासीः केशः
जनाइति समाध्यवस्थेयं अत्र निर्गुणे सत्य प्रेमनिर्गुणो भक्तिरिति पर्यं व्युत्थानावस्थायां सगुणभक्तिमाह अनुयुगमिति युगेषि
युगेषु चित्रजडैक्यो प्रमात् त्वं दर्शय परं वपुः वर्तमानमनुसरत्येत्यर्थः अन्वहं अहंकारममकारावनुसरत्य सगुणस्य श्रीकृष्णादेर्गी
ति गुणकर्मजन्मवर्णनं तत्सपरंपरयाशातत्येन पूर्वोक्तिं नवेत्तीत्यनुषज्यते समाधौ विद्वान्स्वाभिन्नभगवत्स्वरूपप्रेमानन्दनि
मग्नत्वात्तत्सर्वं नवेत्ति व्युत्थिते तु भगवद्गुणगानानन्दनिमग्नत्वादिति अतउत्तमाधमजातिव्यवस्थाकर्मकांडादिप्रामाण्यं च
तत्पूर्वमेव न तदूर्ध्वं मितिभावः ननु विद्वदविदुषोर्व्यवहारः समानः पश्वादिभिश्चाविशेषादिति न्यायात् तथा च
व्युत्थाने विद्वान्कर्म वा पुत्राद्यभिमानं वा कुतो नानुसरति तत्राह श्रवणेति यतोऽपवर्गगतिस्त्वं मोक्षलक्षणा प्राप्या तमेव
मनुजैरधिकारिभिः श्रवणेन भगवत्कथाप्रणाशुभ्रतो ध्यतः साधकदशायां अतः सिद्धदशायामपि तेसंस्कारदार्ढ्यान्त
देवानुतिष्ठति न कर्मादीत्यर्थः जनकादिवत्कथं चिदनुतिष्ठंतोपि न तैः संश्लिष्यंते अभिमानाभावादिति भावः अत्र पूर्वा
र्द्धेनोक्ता निर्गुणभक्तिः फले उत्तरार्धेनोक्ता सगुणभक्तिः साधने यथाचानयोः साध्यसाधनभावस्तथोक्तं श्रीदिव्यसूत्र टीका
यां भक्तिचन्द्रिकायामस्माभिरितीह संक्षेपः २७ पूर्वश्लोके सगुणनिर्गुणोभयभक्तेः पुमर्थहेतुत्वमुक्तं भक्तिश्च माहात्म्यज्ञान
तो भवति माहात्म्यं च पूर्णत्वानंतत्वादिगुणगरिमा अतएवात्र निरस्तनेन भूतयो बोधयंती त्युक्तम् कथं चरितीत्याक्षेपस्या
ह द्युपतय इति भो भगवन् ते तव परमेश्वरस्य सगुणस्य निर्गुणस्य वांते अयमेवं विध एवेत्यवसानं द्युपतय एवये सर्वत्र त्रिलोकप्रसिद्धाः ब्रह्मा
दयस्तएव नमयंयुः न प्रापुः किमुतान्ये अल्पज्ञाः। किमुत त्वमपि न यासीतिविपरिणामेनानुषंजनीयं कुतः अनंततया सगुणस्य विशेषाने
न्यात् निर्गुणस्य निर्विशिषत्वात् अनंतत्वमेवाह यदंतरेति यस्य परमेश्वरस्य तवोत्तरामध्ये ननु अहो अंडनिचयाः ब्रह्मांडसमू
हाः सावरणाः पंचभूताद्यावरणैः सहिताः खे आकाशे रजांसीव धूलीकणा इव असंलग्नाः भवयसा भूतभविष्यद्वर्तमानकालेन सह

वांतिपरिश्रमेति हियस्मादेवं अतः श्रुतयस्त्वमस्या द्याः अतन्निरसनेन प्रपंचनिषेधेन त्वय्यखंडार्थे फलंतीति तात्पर्य
वत्त्यापर्यवस्यंति जगत्कर्तृत्वाद्युपलक्षणप्रकारकान्वयबोधसंभवे पश्चात् आदेशो नेति नेतीत्याद्यनुसारात्तात्पर्यवृ
त्त्यैव निर्विकल्पकबोधाभ्युपगमादिति भावः तर्हि श्रुत्यपर्यवसायित्वमेव न कुतस्तत्राह भवन्निधना इति भव
ति त्वयि श्रुत्यसाक्षिणि निधनं यासां तास्तादृशाः श्रुत्यसाक्षितयापि तस्यावश्यकत्वादिति भावः अत एव नेति नेती
त्यस्मानंतरं न ह्येतस्मादिति नेत्यन्यत्परमस्तीति श्रुतिः सर्वनिषेधेन सर्वनिषेधसाक्षिणं मामेव स्वप्रकाशचिन्मा
16 त्रं म खंडं परिशेषयति अयं भावः यद्यपि इमानि वा इमानि भूतानि जायंते इत्यादि श्रुतयो विधिमुखेन ब्रह्म वदंति। १
तथापि ते निरसनेनैव ताः अपि तत्र पर्यवस्यंति जन्मादिहेतुत्वस्य शाखाचंद्रस्येव लक्षणीयाभूतलक्षणकत्वात् स
त्यत्वादीनामसत्त्वादिशंकाव्यावर्तनेनैव ब्रह्मावगमकत्वादित्यालं विस्तरः अधिकं त्वस्मत्कृतसिद्धांतबिंदुव्याख्याने सि
द्धांतसिंधौ द्रष्टव्यं इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामगोविंदतीर्थशिष्यश्रीनारायणतीर्थकृता वेदस्तुति
व्याख्या समाप्ता अधीत्य सर्वशास्त्राणि वासुदेवदयानिधेः। गुरुश्रीरामगोविंदरूपयोगात्कृतिर्मया नारायणेन यत
तिनान्यस्तामाधवपादयोः। वेदस्तुतिस्तोत्रवर्यव्याख्याश्रीतीर्थराजकं॥ ॥श्रीरस्तु॥ ॥संवत् ७९६
लिखितमिदं व्रजनाथेन॥ ॥श्रीहरिर्जयतितराम्॥ ॥श्रीः॥श्रीः॥ ॥श्रीहरिः॥ ॥

श्रुतिस्तोत्रव्याख्या